यज्जाग्रतो दूरमुदैति दैति वन्न दुसुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेक तन्मे मनः शिवसङ्कल्पमस्तु ।। १ ।

इदंमुपलक्षणं तुरीयायामवस्थायां ध्यानधारणासमाधि-वलेन ब्रह्ममात्रं प्रकाशयतीत्यपि वोध्यं एतस्य सामर्थ्यातिशय-प्रदर्शनाय विशेषणं देवमिति प्रकाशादिकारितया दैवतस्वरूपं पुनः किं भूतं दूरं गम स्वभावत एवं दूरं गमनशीलं ज्योतिषामेकज्योतिः प्रकाशकानामिन्द्रियादीनां मध्ये मुख्यं प्रकाशकं । चक्षुरादीनां तदधीन-त्वादितिभावः ।। १ ।।

Closing :

नमस्ते अस्तु विद्युत्ते नमस्तेस्तनद्रलवे ।
नमस्ते भगवन्नस्तु जन्तः स्व समीहसे ।। ४६ ।।

यत्तो यतः समीहसे तत्तो नो अभयं कुरु ।
शन्नः कुरु प्रजाभ्योऽभयं न पशुभ्यः ।। ४७ ।।

नमस्त इति विद्युते विद्युत्स्वरूपाय स्तनयित्नुः मेघः । तत्तत्स्वरूपाय ते नमः अस्तु ।। ४६ ।। यत्त इति हे रुद्र त्वं यतः यतः समीहसे यत्र यत्र सम्यक् चेष्टां करोमि (पि)तत्र तत्र नः अस्माकं अभयं कुरु नः प्रजाभ्यः प्रजानां श कल्याणं कुरु पशुभ्यः पशूनां अन्येषां अस्मदीयानां अभय शं कुरु इत्यर्थः ।। ४७ ।।

मुनिवेदचन्द्रसंख्यमन्त्राः प्रोक्ताः षडङ्गेऽस्मिन्नपि सर्वतः । धानतराय कपूरस्येद पूस्तकं ।। १ ।।

Colophon : इति मैथिलसन्मिश्रश्रीकृष्णदेवतनयमहामहोपाध्यायः श्रीभवदेव प्रियशिष्यमहोपाध्यायाभिनवाचार्य सन्मिश्रश्रीभवदेवकृतवा षडङ्ग-व्याख्या सम्पूर्णम् ।। श्री शिवार्पण मस्तु ।।

× × ×

72/31531 दानपारिजात

Opening : ।। श्रीगणेशाय नमः ।।

वंदे श्रीमदनन्तसंज्ञगिरिं यं लक्ष्मीनिवासं हरिम् ।
विघ्नध्वान्तदिवाकरं सुरमरुं सर्वार्थसिद्धिप्रदम् ।।

ब्रह्माशर्वसुरेन्द्रपूर्वकसुरा यस्य प्रसादात्सर्वा—
रध्वसमाप्तिमापुरमलं महेशं देवं परम् ।। १ ।।

नत्वा तीरात्विजाजानिं तथा ब्रह्मादिकान् सुरान् ।
गणेशं विघ्नहर्तारं वन्दे हैमवतीं सुतम् ।। २ ।।

चतुर्दशसु विद्यासु निष्ठाताः शुद्धमानसाः ।
अपरोक्तब्रह्मतत्वा जयन्ति गुरवो मम ।। ३ ।।

श्रुतिसकलरहस्यं विचिन्तितं यस्य चित्ते ।
मुकुर इव मुखाब्जं दोषमालिन्यशून्ये ।।

स्वपदविमलभक्त्या यस्य तुष्टो रमेशो ।
जनकजनकथल्हपद्ममेनं नतोऽस्मि ।। ४ ।।

जातोऽहमग्रेण मनोरथेन यस्यानुकम्पामृतवृष्टिपुष्टः ।
पारंगतश्चाखिलदर्शनानां नागेशभट्टं जनकं नतोऽस्मि ।। ५ ।।

वन्दे भागीरथीमंबां गुणौ रवेव शालिनीं ।
यत्प्रसादादहं प्राज्ञो संजातो जडधीरपि ।। ६ ।।

श्रीमत्का एव कुलाब्धिशीतकरणो विद्या कूलाबांनिधिः ।
श्रीमद्विष्णुपदाश्रितुः सरस गुर्विद्वच्चकोरप्रियः ।।

भट्टश्चन्द्र इमं पितृव्यमभिनम्यानन्तभट्टः सुधी—
र्नामा दानविधानसत्सुरतरुं व्यारोपयद्भूतले ।। ७ ।।

सन्ति दानविधौ ग्रन्थाः प्रणीताः सूरिभिःखलु ।
को यस्य महिमावेद्योऽभिज्ञैर्यतिसर्वतः ।। ८ ।।

न पाण्डित्यभिमानेन नापि वित्तस्य लिप्सया ।
निबन्धो रच्यते किंतु किंतु विदुषां परितुष्टये ।। ९ ।।

यत्किञ्चिन्मम चाञ्चल्यं च मां तां विचक्षणाः ।
गुणग्राह्या सदा सन्तो बालस्य पितराविव ।। १० ।।

ग्रन्थस्थानि विकीर्णानि नाना दानानि कृत्स्नशः ।
प्रोच्यन्तेऽत्र मया तानि विष्णुप्रीतिमभिप्सता ।। ११ ।।

ग्रन्थस्यानुक्रमस्तु प्रोच्यते ज्ञानसिद्धये ।।
आदौ दानं प्रशंसेऽहं तत्स्वरूपनिरूपणम् ।। १२ ।।

Closing : शिवधर्मे पार्वत्युवाच —
देवदेव महादेव लिङ्गदानविधिं वद ।
लिङ्गदानफलं चापि वद कृपानिधे ।।

श्रीशिव उवाच—

काश्मीरकाञ्चनादीनि लिङ्गानि विविधान्यपि ।
देयान्यत्यन्तापलेन मत्प्रीत्यर्थं मुमुक्षुभिः ॥

शैव्येभ्य शवदेयानि दत्तस्यानन्त्यमिच्छामि ।
शिवरात्रौ सोमवारे ग्रहणे चन्द्रसूर्ययो ॥

सन्क्रातिष्वपि कर्त्तव्यं शिवक्षेत्रे विशेषतः ।
उपोष्य यावदिवसे शैवान् सम्पूज्य सादरं ॥

प्रार्थनीयास्तदा शैवा लिङ्गदानार्थमादरात् ।
ततो देयानि लिङ्गानि क्षीराज्ये विधिपूर्वकं ॥

अभिषिच्यार्चनीयानि विल्वपत्रादिभिः शिवे ।
सौवर्णे राजते वापि ताम्रे वा भाजने नवे ॥
जववस्त्रसमास्तोर्णे शैवलिङ्गं निवेशयेत् ।

ततः पुनः प्रयत्नीनभस्मविल्वदलादिभिः सम्पूज्य क्षीर-पक्वान्ननैवेद्यानि समर्पयेत् रात्रौ जागरणं कार्यं भक्तिश्रद्धांपुरः सरं नैवेद्यं देयममलं मह्यं चतुष्टये ततः प्रातः समुत्थाय स्नातो विप्रं सम्भर्चय ततः सुवर्णसहितं वस्त्रयुग्मसमन्वितं ग्राह्यं सपात्रं हस्तेन शिवलिङ्गसदात्मकं शिवलिङ्गं शिवाकारे भुवनानि चतुर्दश तस्मादस्य प्रदानेन प्रीयतां भगवान्शिवः इति मन्त्रं समुच्चार्य मद्भक्ताय प्रदापयेत् एकस्मिन्शिवलिङ्गेऽपि दत्तो ।

जगत्रायं वहूनान्तु फलं वक्तुं लिङ्गानां कः क्षयो भवेत् ।
एवं यः कुरुते भक्त्या लिङ्गदानं यथाविधि ॥

स महापापसंघेभ्यः सङ्कराव प्रमुच्यते ।
यं यमर्थं समुद्दिश्य लिङ्गदान करोति यः ॥

सततमर्थं प्राप्नोति मत्प्रसादान्मनोरसे ।
लिङ्गदान समं दानं नास्ति कुत्रापि शैलजे ।

तस्मात्सर्वप्रयत्नेन लिङ्गदानं समाचरेत् ।
एवमर्चया दानमुत्तसमाचरेत् .. इत्युक्त्वा मामकी ।।

मूर्त्ति दध्याद्दक्षिणसंयुतां एवमेव गणेशस्य दुर्गायाः सूर्यवेधोः ।
अन्येषामपि देवानां प्रतिमां प्रतिपारयेत् ।।

तत्तत् लोकमवाप्नोति सर्वत्र जयमाप्नुयात् ।
भग्नां वा खण्डितां वापि दत्त्वा दोषमवाप्नुयात् ।

तस्माल्लक्षणसम्पन्नां प्रतिमां सर्वदार्पयेत् ।
महदेश्वर्य माप्नोति स्वर्गलोके महीयते ।।

Colophon : इति श्रीमदनन्ताचार्यविरचिते दानपारिजाताभिधे निबन्ध शालग्रामविष्णुमूर्त्तिलिङ्गशिवदानविधानानि ।। इति सर्वस्वदानं ।।

Post-colophon : ।। श्रीरस्तु रामो जयति ।। इदं पुस्तकं समाप्तं संवत् १८१८ समये ज्येष्ठमासे शुक्लपक्षे पूर्णिमायां भूमिसुतवासरे लिखतं तिवारि रामचन्द्रेन मडिलागढ वैठें ।। राम राम ।।

× × ×

80/31941 रामनिबन्धः

Opening :

।। श्रीगणेशाय नमः ।।

गुरुं नत्वा च वाग्देवीं विज्ञानं कालनिर्णयम् ।
क्षेमरामेण रामाख्यो निबन्धोऽयं प्रकाश्यते ।। १ ।।

अथ तिथिर्द्वेधा पूर्णा खण्डा च ।

तत्र स्कान्दे—

प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः ।
सम्पूर्णा इति विख्याता हरिवासरवर्जिताः ।।

हरिवासर एकादशी तत्र वेधान्तरं वक्ष्यते ।
तद्भिन्ना खण्डा तद्वेधमाह पैठीनसिः ।।

पक्षद्वयेऽपि तिथयस्तिथिपूर्वात्तिथयऽथोन्तरां ।
त्रिभिर्मुहूर्त्तैर्विध्यन्ति सामान्ये येषां विधिः ।।
स्मृतः दक्षेः त्रिमुहूर्त्ता न कर्त्तव्या या तिथिः क्षयगामिनो ।
त्रिमुहूर्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनी ।।

शिवरहस्ये—
यां प्राप्यास्तमुपैत्यर्कः सा चेत्स्यात् त्रिमुहूर्त्तगा ।
धर्मकृत्येषु सर्वेषु सम्पूर्णां तां विदुर्बुधाः ।।

विष्णुधर्मोत्तरे—
उदिते दैवतं भानु-र्त्रचास्तमितेरवौ ।
द्विमुहूर्त्ततिरन्ध्रश्च सा तिथिर्हव्यकव्ययोः ।।

पाद्मे—
व्रतोपवासनियमे घटिकैकापि या भवेत् ।
उदये सा तिथिस्तत्र विपरीता तु पैतृके ।।

तिथितत्त्वे—
षष्टिं दण्डात्मिकायास्तु तिथिर्निष्क्रमणे परा ।
अकर्मण्यं तिथिमलं विन्ध्यादेकादशीं विना ।।

स्कन्दे—
नागो द्वादशनाडीभिर्दिक् पञ्चदशभिस्तथा ।
भूतो द्वादशनाडीभिर्वर्षयन्नुत्तरा तिथिः ।।
नागपञ्चमी दिक्दशमी ।। इति वेधः ।।

कर्मण्यो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तथा कर्मणि कुर्वीत ह्रास विद्धी न कारयेत् ।।

गार्ग्य :
दिवारात्रिव्रतं यद्वा एककर्म तिथौ गत ।
तस्यामुभययोगिन्यामाचरेत्तद्व्रत व्रतो ।।

निगमे —

युग्मानि युगभूतानां षड्गुण्योर्वसुनन्दयोः ।
क्षुद्रेण द्वादशीयुक्ता चतुर्दश्या च पूर्णिमा ।।

प्रतिपदाप्यमावस्या तिथ्योर्युग्मं महाफलम् ।
एतद्वास्तं महादोषो हन्ति पुण्यपुराकृतम् ।।

तिथ्योर्युग्मं द्वितीया तृतीयायुता तृतीया च ।
तद्युतेति एवं चतुर्थी पञ्चम्यादीनां युग्मा विति ।।

आदित्यपुराणे —

Closing : शकुनाः शपथाः स्वप्नाः सामुद्रिकमुपश्रुतिः ।
एवं पञ्चकलौयुगे भवन्ति न भवन्ति च ।।

इति कलित्रर्ज्यानिर्णयः—अथ निर्णयवक्तुमयोग्यानाह

कालिका पुराणे —

देवे च देवतायां च कर्मण्यपि च वैदिके ।
श्राद्धा नास्ति सदा येषां तेषां वाक्यं विवर्जयेत् ।।

शारदापुराणे पाद्मेपि—

सेतिहासपुराणस्मृतिसिद्धान्तवेदिनः ।
नारायणप्रिया ये च तदुक्तं वेदभाषितम् ।।

Colophon : रामः नन्दाश्वाद्रीन्दुभिर्वर्षे १७७९ कृष्ण जन्माष्टमीदिने जातो रामनिबन्धोऽयं धर्मशास्त्रविचारतः माता श्रोपद्मनी यस्य पिता श्रीभवमण्डनः तेन श्रीक्षेमरामेण निबन्धोऽयं प्रकाशतः ।।२।। इति द्विपञ्चाशद्ग्रन्थीदीक्षितबाबूतदात्मजः श्रीलोकमणिस्तदात्मजः श्री-भवमण्डनस्तत्पुत्रक्षेमराम कृतोऽयं रामनिबन्धः समाप्तः ।

Post-colophon : संवत् १८९५ का ज्येष्ठ शुक्ले ४ रविवासरे ।। श्रीरस्तु ।। ।। मगल ददा (तु) ।। संख्या १८२० ।।

86/32166 संस्थावैद्यनाथ

Opening : ।। श्रीगणाधिपतये नमः ।।

अथावसंस्थाधानं तत्साध्यानि कर्माणि च। कात्यायनानुसारेण लिख्यन्ते तत्राङ्गहीनस्यासमर्थत्वात् । अश्रौत्रियस्यावैदिकत्वात् षंढस्याशुचित्वात् शूद्रस्याप्यवैदिकत्वात् अङ्गहीनश्रोत्रियषंढशूद्रवर्जित-ब्राह्मणराजन्यवैश्यानुलोमजरथकाराणां स्त्रीणां चाधिकारः। ननु रथकाराणां स्त्रीणां चावैदिकत्वात् कथमधिकार इति चेत् । न वर्षासु रथकार आदधीतेति पार्थक्येनाधान श्रुतेः। मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीमित्यादिना स्त्रीणां दीक्षादिदर्शनेन कथमावसंस्था-धानेधिकारावगम इति चेत् ।

Closing : काले काले पुनर्होमान् जुहूयात्प्राग्हुतानपि ।
कठा एवं विथदु केचिन्नेछन्त्यन्ये पुनर्हुति ।।

पूर्वपक्ष तु रात्रौ चेत् स्मृतिशङ्काग्निहोत्रिणः ।
सायं हुत्त्वा न देवा जुहूयात्प्रातराहुतिः ।।

यदि त्वपरपक्षे स्यात्स्मृतिशङ्काग्निहोत्रिणः ।
हुतावशिष्टाः पक्षेस्मिन्न जुहूयात्सकलाहुतिरिति ।।

यद्यपि एतदर्थप्रतिपादकानि शौनकादिवचनानि प्रयोगपारि-जाते उपलब्धानि तथापि मण्डनकारिकानां। प्रमाणत्वेनैव सर्वैरेवा-दृत्वात् नैवात्र लिखिताः।

Colophon : इति श्रीयजुराम्नायमिश्रश्रीकेशवसूनुश्रौतस्मार्त्तप्रचण्डरश्मि-मिश्रश्रीरत्नेश्वरतनुजयाज्ञिकभूवृन्दारकवन्दितवन्दनीयमिश्रश्री वैद्य-नाथप्रकाशिते श्रीसंस्थावैद्यनाथे प्रथमं आननं ।

× × ×

87/31533 सापिण्डय-कल्पलतिकावृत्तियुत

Opening :

।। श्रीगणेशाय नमः ।।

नागेश्वरं गुरुं नत्वा देवनारायणामिधः।
सापिण्ड्यकल्पलतिकां व्याचष्टे प्राक्तनोदिताम् ।।

प्रारिप्सितदुरितशमनाय स्वेष्टदेवता नत्यात्मकं ।
मङ्गलं शिष्यशिक्षायै व्याख्यातृ श्रोतृणा मनुषं ।।

गतो मङ्गलाय च निबध्नन् चिकीर्षतं प्रतीजानीते ।
श्रीमद्गजाननषडाननयुक् शिवौ च श्रीविट्ठलम् ।।

निजगुरुं गुरुमेव नत्वा सापिण्ड्यकल्पलतिकां ।
तनुते विचित्रां देवः सदाशिव इमां शिशुबोधनाय ।।१।।

श्रीमदिति । श्रीसरस्वती बुध्यादिर्वा । गजाननस्यैव श्रीमत्वं विशेषणं । यद्वा श्रीः शोभाविशेषः षड्गुणैश्वर्यं वा विशिष्टविशेषणं श्रीमत्त्वं । श्रीमतौ गणेशस्कन्दाभ्यां युक् सम्पदादित्वावे क्विप् योगः सम्बन्धो ययोस्तौ च तौ शिवौ पार्वतीपरमेश्वरौ श्रीमान्विष्णुः स च गजाननश्च तै युक् गित्यादिपूर्ववदिति कश्चित् च श्रीविट्ठलपदोत्तरं योज्यः । गुरुमेव वृहस्पतिमेव एवोऽभेदरूपकः निजगुरुं स्वीयगुरुं निजपदं स्पष्टार्थं संबंधिशब्दादेव तल्लाभात् । यद्वा ममैत्र गुरुर्नास्येति सूचनाय तत् । यद्वा स्वा हेरम्बभात्रिकगुरुं सर्वोपदेष्टारमिति यावत् । यद्वा तात्त्विकगुरुं परमार्थगुरुमिति यावत् श्रीविट्ठलं च श्रियातत्त्वश्रियायुक्तं विट्ठलाख्यं च नत्वा । देवः देवोपाख्यः । सदाशिवस्तदाख्यः भाविन्या अपि बुध्या विषयीकरणादि मामिति निर्देशः । तेन ग्रन्थकरणक्लेशाभावः सूचितः तथा च इमां बुद्धिस्थां विचित्रां विलक्षणां एतेन प्राचीनग्रन्थैरगतार्थता सूचिता सापिण्ड्यकल्पलतिकां सापिण्ड्यस्य समानः एकःमुख्यः पिण्डः देह आरम्भको यस्या यस्य वासा सपिण्डस्तद्भावस्तस्य साक्षात्परम्परयावैकशरीरावयवान्वयित्वस्येति यावत् रुढ्या च नाति प्रसङ्ग इति ।।

Closing : अथेति । अनन्तरं स्वपत्न्या भगिनी तत्कन्या च करग्रहे च प्रशस्ता नैव भवेदित्यर्थः । अत्र सर्वत्र मातुः सपत्न्याभगिनीं तत्सुतां चापि वर्जयेत् । पितृव्यपत्न्याभगिनीं तत्सुतां चापि । वजयेदिति बोधाय नोक्ते । भार्यास्वसुर्दुहिता पितृव्यपत्नी स्वसाचेति वह्व च परिशिष्टा किञ्चिदंशस्य समूलत्वेप्यन्यांशे मूलं चिन्त्यम् अथ मातुलकन्यापरिणयनमाह । क्वचिदिति ।

अथानन्तर तृतीये चतुर्थे वाकः स्वार्थे विवाह इष्टः । तृतीयां वा चतुर्थी वा पक्षयोरुभयोरपि । विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यम इति चतुर्विंशतिमतोक्तेः । चतुर्थीमुद्वेह कन्यां चतुर्थः पञ्चमोऽपि वा । पाराशर ते षष्ठीं पञ्चमो न तु पञ्चमीमिति पराशरोक्तेश्च । तस्मात्समाना दत्ता चाद्यश्च जायतऽतनुत तृतोये संगच्छावहे चतुर्थे संगच्छावह इति शतपथश्रुतेश्च । तृप्तां जुहूर्मातुलस्येव योषेति वह्व च श्रुतेश्च । अयमपि न सार्वत्रिक इत्याह । क्वचिदिति मुख्यासम्भवे इत्यर्थः । चतुर्विंशतिमते तदभावे युक्त्वा शाकटायन इत्याद्युक्त्या चास्यानुकल्पत्वस्पष्ट प्रतिपादनात् । तथा चानुकल्पत्वेनायं भवतीति सिद्धं । सोऽपि सर्वत्रेत्याह । कुलदेशभेदादिति । तथा च येषां कुलदेशे तदाचारो नास्ति तद्विषयाः सर्वे निषेधाः येषान्तु देशाचारोऽस्ति तेषां न दोषः । येनास्यपितरो याता इति मनूक्ते यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् । इति चतुर्विंशति मतोक्तेश्चेति केचित् । अन्ये तु ब्राह्मादि विवाहे पितृगोत्रनिवृत्ते गान्धर्वादि विवाहेतद् निवृत्ते ब्राह्मादिविवाहोढा पुत्रादेरनुकल्पत्वेन तृतीयादिविवाहेन बाधकं । एवं पितृष्वसृकन्यास्वपि निषेधास्तु गान्धर्वादिविवाहोढा सन्तानविषया एवं कलिवर्ज्यत्वमपि । यद्वा आसुरादिष्वपि देशविशेषेणमातुलसुतादिविवाहो धर्म्यः । तथा च बौधायनः । पञ्चधा विप्रतिपत्तिः । दक्षिणः अनुपनीतेन भार्यया च सह भोजनं मातुलपितृष्वसृदुहितृपरिणयनमित्यादिति दिक् ।।२३।।

पद्यप्रसूनैं शरनेत्रसंख्यैरलङ्कृता कल्पलता मदीया ।
अध्यापकध्येतजनाय नित्यं दद्यादभिष्टानिपरः शतानि ।।२४।।

Colophon : इति श्रीमद्देवालयपुरवासी श्रीनीलकण्ठसूरिसूनु श्रीश्रीपति-सूरिसूनुना आपदेवापरनामधेयेन श्रीसदाशिवदेवेन विरचिता सापि-ण्ड्यकल्पलतिका समाप्तिमगात् ।।२५।।

न्यूनत्वादिव्यत्रधेदायाध्येतृणां प्ररोचनायाह । पद्येति । शर-नेत्रसंख्यैः पञ्चविंशतिसंख्याकैः । इदं चोद्दिष्टां केत्यर्द्धस्य अन्त्यो-द्विनिघ्न...... श्लोकत्वमभिप्रेत्य अन्यथा तु युगनेत्रसख्यैरित्यूह्यं । पद्यान्येव कुसुमानि पुष्पाणि तैर्विभूषिता मदीया कल्पलतासापिण्ड्य-कल्पलता । अध्यायश्चाध्येता च जनश्चोदासीनः प्रेक्षकस्तत् समाहार-स्तुस्यै वा । परः शतानि शतासराणि । सहस्रादीनि अनन्तानीति यावत् । पारस्करादित्वात्सुडागमः वांछिता नित्यं सर्वदा दद्यात् ददातु प्रार्थनायां तु लोडिति शिवं ।।२४।।२५।। श्रीमद्रामकृष्णदेवसूरिसूनु-श्रीमन्नारायणदेवविरचिता सापिण्ड्यकल्पलतिकावृत्ति सम्पूर्णं ।

वैद्यनाथतनूजेन बालकृष्णधीमता ।
पायगुण्डेन त्रै काश्यां देवादेशात् समीरितः ।। १ ।।

इति सापिण्ड्यकल्पलतिका सम्पूर्णं ।।

Post-colophon : श्रीलक्ष्मीनृसिंहार्पणमस्तु । संवत् १८६७ कार्त्तिककृष्णा ३० मु० बदनूर । श्री श्री श्री श्री ।।

× × ×

88/31532(1) सापिण्ड्य-निर्णय

Opening : ।। श्रीगणपतये नमः ।।

अथ आश्वलायनाः ।

सर्वेषामाश्रमाणां च गृहस्ता (था) श्रम उत्तमः ।
तमेवाश्रित्य जीवन्ति सर्वे चैवाश्रमा इव ।।

कुलजा सुमुखीं स्वाङ्गीं सुनासां च मनोहरां ।
सुनेत्रां सुभगां कन्यां निरीक्ष्य वरयेद्बुधः ।।

अनन्युर्पाविकां कान्तासमानां यवीयसीम् ।
आरोगिनीं भर्तृवतीं कन्यां तां वरयेद् बुधः ।।

अथ सापिण्ड्यनिर्णयः—

वध्वा वरस्य वा मुख्य पितृद्वारक सापिण्ड्यं ।
तु कूटस्थामारभ्य सप्तमादूर्ध्वं निवर्त्तते ।।

यतोरेव मुख्यपितृद्वारकं तु तमारभ्यैव ।
पञ्चमादूर्ध्वं निवर्त्तत इति सिद्धम् ।।

ततश्च —

मुख्यकल्पेन कुलद्वय वर्जनीय कन्यानां ।
अभियुक्तोक्तसंख्योपपन्ना भवति ।।

अथाहुः ।

उद्वोढुः पितरौ पितुश्च पिसरौ तज्जन्मकृद्दम्पति ।
द्वन्द्वं तस्य चतुष्कमष्टकमथस्य क्रमाच्छोऽष ।।

वशारम्भकदम्पती प्रमितरीत्या सप्तक क्षरन्दा ।
एकैका च य कन्यका पितृकुलेत्या सप्तकक्षं ब्रुवे ।। १ ।।

Closing : मातुरिति । अत्रापि वरः प्रथमस्थाने । तस्य पितरौ द्वितीयौ । पितरौ तृतीये द्वन्द्वमेकं तयोः प्रत्येकं जनकद्वन्द्व चतुष्टयं पञ्चमे । एतेषां सप्तद्वन्द्वानां मध्ये एकैकान्वये पञ्चदशसपिण्डाः कन्या भवति । यत्किञ्चिदेकद्वन्द्वकूटस्थप्रथमस्थाने ततः पुत्रो दुहिता चेति द्वन्द्व द्वितीये । प्रत्येकताभ्यां जातद्वन्द्वयुगं तृतीये । ततः पूर्वोक्तरीत्या

द्वन्द्वचतुष्ट्य चतुर्थे। ततः एवं रीत्या द्वन्द्वाष्टकं पञ्चमे। एवं पञ्चदशद्वन्द्व प्रतिष्ठाः पञ्चदशकन्या सम्पद्यन्ते। इय सख्या शर-क्षोण्य इति पदेनाभिधीयते। शरापंचरक्षोण्यो केति। १६। उक्त-सप्तद्वन्द्वेषु प्रत्येकं पञ्चदशसंख्याङ्गीकारेण पञ्चोत्तरशतसंख्या सम्पत्तिः। सा च शराभ्रविधव इति ॥१०५॥ कुलेभि पञ्चमश्लोके पूर्वोक्तपितृवंशगतायाः पञ्चोत्तरशतसंख्या मेलनेन महान् संख्या एकविंशतिसंहितशताधिकद्विसहस्री रूपोच्यते। हिमांशुदृक्धरादृश इति ते। हिमांशुरेकः दृशौ द्वे उक्तरीत्या २७२७ इदृशांकसिद्धिः ततश्च तावत्याः कन्याः कुलद्वयगता मुख्यकल्पेन विवाहकर्मणि वरेण वर्जनीया इत्यर्थः। अवादीत्थममनन्तेन सापिण्ड्स्य निर्णयः। निर्मत्सरा ये विद्वान्सः तोषं यान्तु तेमुनां॥

Colophon : इत्यन्तरदेवोय संस्कारकौस्तुभे सापिण्ड्यनिर्णय समाप्तः।

Post-colophonic : संवत् १८९७ आश्विन्य कृष्ण तृतीया।

× × ×

89/31532(2) सापिण्ड्यप्रदीप

Opening : ॥ श्रीगणेशाय नमः ॥

सापिण्ड्यं नाम एकपिण्डः देहः आरम्भको यस्या यस्य वासा सपिण्डास सपिण्डस्तद्भाव इत्यर्थ इति विज्ञानेश्वरः।

एवं चैक शरीरावयवान्वयेन सापिण्ड्यं।
स च क्वचित्साक्षात् क्वचित्परम्परया॥

मातृष्वसृपितृष्वस्त्रादिभिरप्येक शरारावयवान्वयो स्त्येव।
पतिपत्न्योस्त्वेकशरीरे उभयारब्धे स्वावयवाचयात्॥

भ्रातृभार्याणामपि परस्परं स्वारब्ध संतान्वयवान्वितसन्ताना-रम्भकत्वेन । एवं यत्र यत्र सपिण्डशब्दस्तत्र तत्र साक्षात्परम्परया वा एकशरीरावयवान्वयो द्रष्टव्यः । योगरुढिभ्यां च नातिप्रसङ्गः । सगोत्रत्वसमानाधिकरणसापिण्ड्यमेव दशाहाशौ चादौ प्रयोजकमिति न मातामहादीनां दशाहाद्याशौ च प्रसक्तिः । न चैव दत्तकपुत्रे प्रतिगृहीतृ सापिण्ड्यं न स्यात् । तदवयवान्वयाभावादिति वाच्यम् । पुत्रत्वबुध्यालिङ्गनचुम्बनादिभिस्तत्रापि प्रतिगृहीतत्रवयवातवयसत्वात् ।अतिप्रसङ्गस्तु रुढ्यैव वारणीयः ।

Closing : तत्र वर्द्धयितृयगोत्रेण संस्काराभावात् । उत्पत्तिसमयप्राप्त-जनकगोत्रप्रवृत्तौ मानाभावादवर्द्धयितृगोत्रसंबंधाभावाच्च । वस्तुतोनुपदोक्तवृद्धगौतमबृहन्मनुनारदवचांसि महानिबन्धेष्वदशनान्नि-र्मूलान्येव । एतेन शुद्धदत्तकस्य प्रतिगृहीतृकुले त्रिपुरुष सापिण्ड्यं जनककुले तु साप्तपौरुष तदिति मन्दपण्डितोक्ति । उभयकुलेपि साप्तपौरुषमिति च भट्टवासुदेवोक्तिश्चेति तत्स्वजनककुले साप्तपौरुषं पालककुले पञ्चमपर्यन्तमिति च गोविन्दार्णवोक्तिश्च कुलद्वयेपि त्रिपुरुषमिति च परास्ता तावत् ।

Colophon : इति श्रीमत्कालोपनामकशिवमहसुतसतां गभंजनागोजोभट्ट-कृतः सापिण्ड्यप्रदीप. समाप्तः ।। शुभं भवतु ।।

x x x x

290/31211 भगवद्गीता-गीतामृततरङ्गिणीटोकोपेता

Opening : ।। श्रीगणेशाय नमः ।।

श्रीवल्लभो जयति लोकहितैकबंध ।।

यन्नामस्मृतिमात्रेण निःशेषक्लेशसक्षयः ।
जायते तत्क्षणादेन त श्रीकृष्णं नमाम्यहम् ।।१।।

यत्कृपावृष्टिसंसिक्ताः स्नेह पल्लविताः सदा ।
रमयन्ति स्म गोपीशतं श्रीवल्लभमाश्रयः ।।२।।

श्रीविट्ठलपदाम्भोजकृपा मधुसुपूरितः ।
व्याख्यास्ये भगवद्गीतां भक्तिमार्गानुसारतः ।।३।।

तत्र गीताशास्त्रं किं परिमिति पूर्वं विर्चायते तत्र शङ्कराचार्यो भगवान् सृष्टवेदं जगत् तस्य स्थित्यर्थं प्रवृत्तिलक्षण धर्मं तन्निश्चय-सार्थं निवृत्तिलक्षणं धर्मं चिर्षिभ्यो ग्राहयित्वा साम्प्रतं कलावधर्मेण धर्मेऽभिभूयमाने तद्रक्षार्थं स आदिकर्ता नारायणाख्यो विष्णुःदेवक्यां वसुदेवादंशेन किल संबभूव ।

Closing : तस्मादित्यादि यस्मादेवं शास्त्रार्थस्तस्मात्तदज्ञानात् सम्भूतं हृदि वर्तमान एन पुनः पुनः अज्ञानादनुभूयमान सशयं ज्ञानासिना मदुक्तज्ञानरूपेण खडगेन छित्वा निवृत्य योगं मदाराधनस्वरूपमन्यं वा अतिष्ट कुरु अतस्तूष्णीं भावं त्यक्त्वा उत्तिष्ठ मदुक्तं युदध कुर्वित्यर्थः ।।

Colophon : इति श्रीमद्वल्लभाचार्यमतवर्ति तद्वश्यं श्रीशामलसुत व्रजराजविरचितायां गीतामृततरंगिण्यां चतुर्थाध्यायविवरणं समाप्तम् ।।

× × ×

456/31315 अधिकरण-ग्रन्थ

Opening : ।। श्रीगणेशाय नमः ।।

नन्दसूनुं नमस्कृत्य सर्वलोकेश्वरेश्वर ।
निरुप्यतेधिकरणं रामकृष्णेन विश्रुतम् ।।

अधिकृत्य क्रियतेऽर्थाद्विचारो यस्मै तदधिकरणं मीमांसासिद्धान्तः तस्याङ्गानि पञ्च यथाह भट्टः—

विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरं ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेधिकरणं स्मृतम् ॥

विषयममुधिकृत्य विचारः क्रियते विषयः विप्रतिपत्यासंशयः पूर्वस्य वादिनोमतं पूर्वपक्षः चादि निरासकं वाक्यमुत्तरं निरासश्चासदुत्तरेणाप्य प्रतीतस्य वादिनः सम्भवतीत्यत निर्णयश्चेति प्रमारूप इत्यर्थः ।

परिषदाधिकरणं यथा सप्तदशावरा ऋद्धि कामाद्वादशरात्रं सत्रमुपाक्षीरन् य एव यजमानास्त एव ऋत्विज इति श्रूयते सप्तदर्शा वदे निकृष्टा येषां ते सप्तदशकर्तृकं सत्रं भवति य एव यजमाना इति तथा च सर्वैरेव होतव्यमिति पूर्वपक्षे जैमिनिसूत्रसत्रे वर्यो हेतोरन्येषामथालमिति ।

Closing : अथ तदायुत्कर्षन्यायः उत्कर्षस्य कालं विहाय उत्तरकर्त्तव्यता तथा च यत्कर्म तदादिभूतं तत्स्वकाले कृत्वा स्वं उत्तरकालकर्त्तव्यं यथा सपिण्डनं स्वकालेऽपराह्णे कृत्वा तद्दिवसोयं सांवत्सरिकं मध्याह्नाभावेपि कर्त्तव्यं सपिण्डनस्य तदादित्वात् न च तदंतापकर्षन्यायात्सपिण्डनं पूर्वाह्नादौ कृत्वा सांवत्सरिकं मध्याह्ने क्रियतां एकस्य कालत्यागे विनिगमनाभावादितिवाच्यं सपिण्डनस्य भावरूपपितृप्राप्तिफलजनकत्वात् भावात्मकफलं तू मुस्यकालं नैव भवति सांवत्सरिकस्य प्रत्यवायपरिहारमात्रार्थकत्वेन गौपाकालेपि संभवात् । अत्र केचित् तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यत इति वचनात् सपिण्डनात्परं सांवत्सरिकं कर्त्तव्यमिति वदन्ति । तत्र असंक्रान्तेपिकर्त्तव्यमाह्निकं प्रथमं द्विजैः तथैव मासिकं पूर्वं सपिण्डीकरणं

तथेत्यस्य निर्विषयत्वापत्तेः तेनैव च सपिण्डत्वमिति वचनस्य त्वनाकरत्वात् स करत्वेथेकाश्यादि क्रियमाणपतितसपिण्डन-परमिति ।

× × ×

529/32000 सिद्धान्तज्योत्स्ना

Opening :

।। श्रीगणेशाय नमः ।। श्रीनिंबार्काय नमः ।

श्रीमतीं गौरवर्णाङ्गीं श्यामां श्यामललामिकाम् ।
श्यामाङ्गभूषणं वन्दे कृष्णं नैम्बसुखाश्रयम् ।।१।।

नमस्कृत्य जगद्वन्द्यं निम्बादित्यं भवच्छिदं ।।
पूर्वसिद्धान्तवाक्येन वर्षकृत्यं प्रतन्यते ।।२।।

इह खलु प्रचण्डो दण्ड्यकालोत्प्रेक्षणनष्टद्विविधमनोरथानां शीतोष्णादिद्वंद्वप्रचुरबहुलतरश्रमनिर्वृत्तिस्तयोर्द्वंजितचेतसां श्रीमन्निम्बार्कसम्प्रदायस्थौदम्बरऋष्यादिकृतार्थपञ्चकादिनिबन्धानां बहुलतरत्वात्तल्लेखनविचारविधिपरमालसानां सुवैष्णवानां हिताय निर्णीतसिद्धान्तवाक्येन वर्षकृत्यं विशदयति ।

अविद्धैकादशीसक्तो विष्णुधर्मं विधायकः
रिष्टंस्तुधर्मोपविष्णु स हि वैष्णव उच्यते ।।

Closing :

गोपालवल्लवीं वन्दे नित्यरासरसोत्सकम् ।
राधां कृष्णात्मिकां कृष्णं राधात्मकमनुत्तमम् ।।

नाहं विप्रो न भूपो न कृषिरतजनो नापि शूद्रो वरश्च नाहं ।
वर्णी गृहस्थो न विपिनहितरतिः कर्महारी यतिर्वा ।।

नाहं शैवो न शाक्तो न च गणपतिः सूर्यकीर्त्याधिकारी ।
किंतु श्रीपङ्कजजाङ्घ्रेः परमसुखनिधेःकृष्णचन्द्रस्य दासः ।।२।

सुधियः क्षम्यतां संतो मम धाष्ट्र्यं कृपालवः ।।
संग्रहः स्वप्रबोधार्थं कृतं नाना निबन्धतः ।।३।।

Colophon : इति श्रीमत्परमवैष्णवाचार्यश्रीमन्निम्बादित्यमतानुयायि-श्रीमत्तुलारामाभिधाविदितचरणचिन्तकेन घनीरामेण कृतायां नैम्व्यव्रतसिद्धान्तज्योत्स्नायां द्वादशमासव्रतोत्सवविशेषनिधि-र्नाम द्वितीयोल्लासः ।। समाप्तोऽयं ग्रन्थः । अनेन श्रीराधाकृष्ण-देवौ प्रियताम् ।।श्री हरिः ।।

Post-colophon : लिखितमिदं पुस्तकं कार्त्तिक शुद प्रतिपदायां गुरौ सवत् १८६६ । जयनगर मध्ये जगतसिहस्य राज्ये ।।

× × ×

1230/31168 सर्वोत्तमस्तोत्र-विवृत्ति

Opening : ....रामृतास्वादसिद्धिफलं वक्ष्यन्तीत्येतत्सर्वमग्निकुमारस्य ऋषि-तन्निरूपणे ज्ञापितं भवति अतएव फलकथनानन्तरं अग्रे न संशय इति स्वानुभूत्येनैवोक्तं ऋषि निरूप्य छन्द आहु नाम्न छन्दस्तु जगतीति छन्दोनाम असाविति तदुक्तमपि दुर्बोधमित्युपक्रमादार-भ्येत्यानन्दनिधेः प्रोक्तमित्यन्तं यत् छंन्दस्तदसौ जगती तल्लक्षणं तु द्वादशाक्षरं जगती छन्द इति विनियोगो ।

भक्तियोग प्रतिबन्धं विनाशनं........
कृष्णाधरामृतास्वाद सिद्धिरत्र न संशय ।।६।।

पिङ्गले व्याख्यातं तत्संख्यया तदुक्तमपीत्युपक्रमादित्यानन्द-निधेः प्रोक्तमित्यन्तं तत्पूर्णं भवति ननु यदि अग्निकुमारोक्त-पुष्टिमार्गीयतन्मन्त्ररूपत्वमेवैतत्स्तोत्रस्य तदा तन्मन्त्र एवाधुनापि

कथं नोपदिष्टः किमेतस्य कथने प्रयोजनमिति चेत्तत्राहुः श्रीकृष्ण-स्य देवता चेति अथ भावः

Closing : तद्स्नानाभिज्ञेषु प्रकाशनीयमिति ज्ञापितं कृष्णरसार्थित्वो-क्त्या उद्भूतभावानामेवाधिकारो नान्येषामिति सूचितं जपात्व-कथनेन यथा यथा जपति तथा भावोद्रेकेण तद्रसस्वभावेन परम-निगूढत्वेन तद्रसानुभवपूर्वकं स्वहृदय एव जप्यं भवति न तु कस्य-चिदग्रे कथयितुं शक्यं भवतीति भावः ।

न साधनं न निष्ठा च न धर्मः कोऽपि वर्तते ।।
तथापि हि तदुक्तार्थविचारे यत्स्थितं मनः ।।१।।

क्षणैकं मे परं तत्र कारणं तत्कृपेक्षणम् ।।
तद्विचारोत्थिता भावाः परमानन्ददायिनः ।।२।।

अनूदिता मया त्वत्तः प्रभवो द्रढयन्तु तान् ।।
अयोग्ये मयि सम्भूता इति सत्त्वे तु संशयः ।।३।।

तत्संशयं तत्करुणादृष्टेरेव निरस्यतु ।।
यद्यपीह कृतं बाल्यं मूढेन तदपि स्वतः ।।४।।

तथात्मसात्कृतत्वेन क्षमन्तां,
प्रभवो मम श्रीमदाचार्यचरणाः ।।
श्रीमान् श्रीविठ्ठलप्रभुः तदीयास्तद्रसार्द्रा
ये शरणं मम ते सदा ।।५।।

Colophon & Post-colophonic इति श्रीविठ्ठलेश्वरविरचिते सर्वोत्तमस्तोत्रम् विवृति श्री-चात्रागोपेश्वरविरचिते भावरत्नसंपूर्णम् । इदं पुस्तकं पटेल

मोतीचन्द पठनार्थं लिख्यन्तं संवत् १८६३ अषाढमास कृष्ण ५ ।।

× × ×

1246/31878 शिवरहस्य

Opening : ।। श्रीगणेशाय नम ।। श्रीसरस्वत्यै नमः ।।

श्रीगुरुभ्यो नमः ।।ओम्।।

माहेश्वरे पुरा सत्रे प्रवृत्ते मुनयस्तदा ।
यदृच्छया गतं सूतं पैप्पलादं हि सत्रिणः ।।१।।

वाजश्रवमं आहुस्तं समवेता महर्षयः ।।
कृष्णाजिनोत्तरासंगा भस्मोद्धूलितविग्रहाः ।।२।।

त्रिपुण्ड्रविलसत्काला रुद्राक्षांगदकंकणाः ।।
यज्ञेश्वरं महारुद्रं पूजयंतोध्वरेण ते ।।३।।

लिङ्गेऽग्निहोत्रे सूर्ये च रुद्रसूक्तजपाहराः ।।
पञ्चाक्षरावृत्तिपराः शिवनामपरायणाः ।।४।।

पञ्चकोशातिगं देवं पञ्चास्यं परमेश्वरं ।।
ध्यायन्तः परमा भक्त्या तं प्रपच्छुरकल्मषाः ।।५।।

सम्पूज्यार्घ्यासनैर्भोज्यैः प्रश्रयप्रश्नभाषणैः ।।
अन्योन्यं कुशलप्रश्नैः प्रश्नपावनतास्तदा ।।६।।

मौनिभार्गव उवाच—

तेषां कुलपतिर्वृस्वः प्राहतं मौनिभार्गवः ।।
पैप्पलादसनाथा स्म त्वदागमनतो वयम् ।।७।।

माहेश्वरं यतः सत्रं प्रवृत्तं पारमेश्वरम् ।।
त्वं भक्तो ऽतीव रुद्रस्य स्कन्दनन्दीशसंनिभः ।।८।।

जैगीषव्यो मुनि पूर्वमूर्ध्वरेतो महातपाः ।।
शङ्कराज्ञा प्रभावेन स्कन्दाय प्रोक्तवान् शुभम् ।।९।।

पुण्यं शिवरहस्याख्यमिति ह्यसो तमोत्तमम् ।।
त्रिनेत्रापारचरितं, द्वादशांशसमन्वितम् ।।१०।।

उपासिता त्वया पूर्वं मनो वाक्ग्भ्यामकर्मभिः ।।
भक्त्या त्वनन्यया शम्भोः त्वयि य प्रोक्तवान् त्वयम् ।।११।।

यस्मिन् ददौ हरः प्रीत्या संच्छ्रितेषु मुनिष्वपि ।।
द्वादशांशयुतं साक्षात् रहस्यं शिवसम्भवं ।।१२।।

Closing :

जाते पादाभिपाते चलितं महितले सव्यथे भोगिनाथो ।
साक्रन्दे दंतिवृन्दे विलुठति कमठे चंचले शैलजाले ।।

नादोन्निद्रे समुद्रेनेह रमणसुता नायके जागरुके ।
साश्चर्यमधुर्यत्त्रिभुवनमधुना पश्य मे ताण्डवत्वम् ।।३१।।

या पादा या सखेदक्षुभितफणिफणारत्ननिर्यत्न निर्यच्छ ।
यामा या पतंगद्युतिमुदितवियद्वाहिनी चक्रवाकम् ।।

अभ्रान्तभ्रान्तचूडातुहिनकरकरालीकनालीकनाच्छेद ।
मोदानुधावदुहिणरथरवगं धूर्जटेस्ताण्डवं मे ।।३२।।

Colophon :

इति श्रीस्कन्दस्तुतिर्नाम षष्टितमोध्यायः ।।६०।। प्रथम माहेश्वरांशः समाप्तः ।। श्रीविश्वेश्वरार्पणमस्तु ।।

+ × ×

1275/32026 चण्डिकार्चन-चन्द्रिका

Opening :

।। श्रीगणेशाय नमः ।।

नमस्कृत्य गुरुं भक्त्या विघ्नराजं सरस्वतीम् ।।
नवार्णवपद्धतिं वक्ष्ये सर्वतन्त्रानुसारतः ।।१।।

श्रीशङ्करानन्दगुरुपादपद्मप्रसादतः ।।
ईश्वरात्रिथयोगी श्रीचण्डीपूजाक्रमं ब्रुवे ।।२।।

नित्यनैमित्तिकं काम्यमनुक्रमेण दृश्यते ।।
यस्या श्रीचण्डिकापूजापद्धतौ भक्तकामदा ।।३।।

तत्रादौ साधकेन्द्रो रात्रिशेषे समुत्थायावश्यकं कृत्वा हस्तपाद-मुखानि प्रक्षाल्याचम्य स्वस्तिकासनेनोपविश्य ब्रह्मरन्ध्रस्य सहस्र-दलकमलकर्णिकामध्ये श्रीगुरुं ध्यायेत् ।

श्वेतं श्वेतविलेपमाल्यवसनं वामेन रक्तोत्पलं ।
विभृत्याप्रिययेतरणेन तरसा श्लिष्टं प्रसन्नाननं ।।

हस्ताभ्यामभयं वरं च दधतं शम्भुस्वरूपं परं ।
हालालोहितलोचनोत्पलयुगं ध्यायेत् स्थिरस्थं गुरुं ।।१।।

इति ध्यात्वा मानसैः पूजयेत् हसक्षमलवरयुं सहक्षमं लवरयीं श्रीअमुकानन्दनाथामुकांबा श्रीपादुकां पूजयामि तर्पयामि नम एवं क्रमेण श्रीपरमगुरुं श्रीपरमेष्टिगुरुं च सम्पूज्य संतर्प्य गुरुमन्त्रं दशधा जप्त्वा तद्दक्षकरे चैतन्यामृतेन समर्पयेत् उमया पूर्वे घुरणे रात्रोच्चरितमुत्छ्वासनिःश्वासात्मकं षट्शतोन्तरमेकविंशतिसहस्र-संख्यात्मकजपा जापमहं करिष्ये इति सङ्कल्पः ।

हुंकारत्रयमुच्चारयन् मूलाधारस्थितां प्रसुप्तभुजङ्गाकारां

सार्धत्रिवलयाङ्कितां चन्द्रसूर्याग्निप्रतिकाशां जगन्निर्माणरूपां कुण्डलिनीनामशक्तिस्वस्थानादुत्थितां ध्यात्वा ब्रह्मरन्ध्रस्थपरशिवलीनां ध्यायेत् ततः शिवशक्त्योः सामरस्यमुखानुभवनिर्गतपीयूषधारात्रिरात्मानं परिप्लावितं ध्यात्वा तत्प्रभापटलामलदेहे हृदये वा स्वेष्टयन्त्रं ध्यायेत् ततो ऋष्यादिकषडङ्गन्यासध्यानपूर्वकमष्टोत्तरशतं जप्त्वा समर्प्य स्तवीत ।

समुद्रमेखले देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥१॥

इति भूमिं प्रार्थ्य शयनस्थलोच्छ्वासानुसारेण भूमौ पादं दत्वा वहिर्निगत्य मूलमन्त्रेण दन्तधावनमुखप्रक्षालनं कुर्यात् । ततो नद्यादौ गत्वा मूलेन मृत्तिकयाङ्गं विलिप्य मलापकर्षणं स्नानं कृत्वा वैदिकस्नानान्तरं वक्ष्यमाणरीत्याचम्य अर्घ्येत्यादिदेशकालौ स्मृत्वा ममोपपान्तकदुरितक्षयद्वारा श्रीचण्डीप्रीतये मन्त्रस्नानमहं करिष्ये इति सङ्कल्पः ।

Closing.

तदुक्तं लीलावत्यां—वराटकानां दशकद्वयं यत्सा काकिणी ताश्च पणश्चतस्रः ते षोडशद्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः अस्यार्थ बराटका २० काकिणी बराटिकाः ८० पणबराटका १२८० द्रम्मबराटका २०४८० निष्कः तथा हि भोजयेच्च शतं बिशन् भक्ष्य भोज्यैः पृथग्विधैः तेभ्योपि दक्षिणां दत्वा गृह्णीयादाशिषस्ततः

एवं कृते जगद्वश्यं सर्वे नश्यन्त्युपद्रवाः
राज्यं धनं यशः पुत्रानिष्टमन्यं लभेत्तु सः

एतद्दशगुणं कुर्यात् चण्डीसहस्रजपविधिः विद्यावतः सदाचारान् ब्राह्मणान् वृणुयावृतं प्रत्येकं चण्डिकापाठान् विदध्युस्ते दशवृतान् अयुतं प्रजपेयुस्ते प्रत्येकं च नवार्णवं पूर्वोक्ताः कन्यकाः पूज्याः पूर्वमन्त्रैः सन्तं ।

शुभाः एकादशाह सम्पाद्य होम कुर्यात्प्रयत्नतः ।

इतिदशदिनपक्षः सप्तसत्यासत्तावृत्य प्रतिश्लोकं विधानतः लक्षसंख्यं नवार्णेन पूर्वोक्तैर्द्रव्यसंचयैर्होतृभ्यां दक्षिणां दत्वा पूर्वोक्तान् भोजयेत् द्विजान् सहस्त्रं सम्मितान् साधन् देवाराधनतत्परान् एवं सहस्त्रं संख्याकै कृते चण्डीविधौ नृणां सिध्यत्यभिप्सितं सर्वं दुःखौघश्च विनश्यति मारीदुर्भिक्षरोगाद्या नश्यन्ति विमनोच्चयाः नेमं विधिं वदेद्दुष्टे खलेन गुरुद्रुहि साधौ जितेन्द्रियेदं ते वदेद्विधिमिमां परं एवं सा ।

चण्डिका तुष्टा वक्तृन् श्रोतृंश्च रक्षतीति ।

वेदाङ्गशैलावनिवर्षमध्ये त्रयोदशी जीवदिने च पौषे शुक्लेदले विक्रमतो निबद्धः पूर्ति गतः शङ्करसुप्रसादात् ।

Colophon. इतिश्री इतीश्वरयोगिचिद्रूपानन्दकृतायां चण्डिकार्चनचन्द्रिकायां षष्टः परिच्छेदः ।।६।।

सं. १६२६ मीति चैत्रशुक्ल चतुर्थ्यां लीप्यकृतं वैद्य श्योबकस स्वात्माय यजनं कुरुः लीषी प्रत्य गुरुजी श्री १०८ बासुदेवजा की सु.

1279/30372 मन्त्रचन्द्रिका

Opening. ।। श्रीगणेशाय नमः ।।

आरक्ताभं त्रिनेत्रं पृथुरतजठरं वेदहस्तान् दधानं
विभ्रद्मौलिदेशे हिमकरशकलं दानधाराप्तकुम्भैः ।
ब्रह्मेन्द्राद्यैः समस्तैरमरपरिवृन्दैः सेवि(त) शुभ्रदन्त.
भोगीराद्यं प्रसन्न सकलशुभकरं तं भजेह गजाननम् ।।१।।

उदितदिवाकरं दे(व) पुर हर वामाङ्कृतगेहां ।
परिपूरितभक्तेहां सस्नेहां शैलजां वन्दे ।।२।।

फुल्लन्ति वारिजगणा विहरन्ति कोकाः
कामं चरन्ति विहगः सकलासु दिक्षु ।
शिष्याः पठन्ति च भवन्ति शुभानि लोके,
यस्योदये तमहमाशु रविं नमामि ।।६।।

यः खड्गसारथिरथो रथमेकचक्रं,
प्रासद्य तत्र विनियोज्य च सप्तसप्तीन् ।
लोकभये तपति चित्रचरित्रकारी भानुः
स भानुभिरहो मम पातु देहम् ।।७।।

दो योगिनामपि मनश्चपलीचकार,
पुष्पेषुभिर्व्यथयतिऽस्मान् ....सोऽयः ।
तं...... नेत्रशिरनाश मया चकार,
मारं...... तमहमाशु नमामि भक्त्या ।।८।।

चलच्चरणताडितक्षितितलं सुपर्वापगो,
चलज्जलभृतां वरं भ्रमितभीमनेत्रत्रयम् ।
जटापटलभेदितो परिचराम्बुदं,
धूर्जटेस्तनोतु पद्रुतभण्डवं मम नवं नव मङ्गलम् ।।९।।

Closing : अथ दीक्षायां कालविशेषः । ज्ञानार्णवे । मन्त्राद्यारम्भणं कुर्यात् ग्रहणे चन्द्रसूर्ययोः । ग्रहणाद्देत्रदेवेशिकालः सप्तदिनावधि । तथा कुलमूलावतारे । पवित्रपर्वदेवेशिदायने वा शुभदिने । कालचर्चा न कर्त्तव्या ग्रहणे चन्द्रसूर्ययोः । पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये । तथा रत्नसागरे । सत्तीर्थकविधुग्रासे तन्तुदामनपर्वणो । मन्त्रदीक्षां प्रकुर्वाणो मासतिथ्यदावत्र शोधयेत् । अत्र यद्यपि सूर्यसोमग्रहणयो दीक्षायां समानकालतोक्ता तथापि ग्रहणप्रशंसकानि वचनानि सूर्यग्रहणपराण्येव ज्ञेयानि ।

'सूर्यग्रहणकालेतु नान्यदन्वेषितं भवेत्
'सूर्यग्रहणकालेन समो नान्यः कदाचन ।।

अत्र यद्यत्कृतं सर्वमनन्तफलदं भवेत् ।
'न मासतिथिवारादिशोधन सूर्यपर्वणि ।।

'ददातीष्ट च गृह्णीयात्तस्मिन्काले गुरोर्नरः ।
सिद्धिर्भवति मन्त्रस्य विनाभ्यासेन वेगत ।।

इति चिन्तामणिकालिकोद्भवयोः सूर्यग्रहणस्यैव विधायकवचनदर्शनात् । चन्द्रग्रहे च या दीक्षा वनचारिणां । जनकस्य तु या दीक्षा दारिद्रयं सप्तजन्मनि योगिनीतन्त्रे । चन्द्रग्रहणे दीक्षानिषेधवचनदर्शनात्प्रागुक्तरजनोमन्त्रदाननिषेधवचनाच्चेति । सूर्योपरागकालोप्युपरागसाधारणतया नात्यन्तप्रशस्त इति ज्ञेयं । 'किंतु चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये मन्त्रस्य कथनमुपदेशः स उच्यते । इति कालिकोद्भववचनान्मन्त्रान्तरेषु विधिवद्दीक्षितानां कौतुकार्थमन्त्रग्रहणेच्छा चेद्भवति तदा निजगुरोरेव सकाशाच्चन्द्रसूर्यग्रहणकालोप्युपदेशरूपतो मन्त्रग्रहणे न दोषावह । इति

Colophon . स्वामिजगन्निवासात्मजश्रीगोस्वामिजनार्दनविरचितां मन्त्रचन्द्रिकायां दादशः प्रकाशः । समाप्तेय मन्त्रचन्द्रिका ।

यावत्सूर्यश्च सोमश्च यावत्तिष्ठन्ति देवताः ।
तावदास्तां धरामध्ये सचिरा मन्त्रचन्द्रिका ।।१।।

श्रीरस्तु शुभमस्तु ।

× × ×

1283/3616 मन्त्रार्थदीपिका

Cpening. श्रीमतेरामानुजाय नमः ।

अथ मन्त्रव्याख्या लिख्यते । ऋतं चेत्यादि । अयमृग्वेदीयो मन्त्र । अपरश्च तैत्तिरीयः । तत्र रात्रिरजायेति पाठः । समुद्रोर्णव इति च अकल्पयदिव इति च संहितम् । स च मन्त्रो माध्यन्दिनीयैनं पठनीयः । याज्ञवल्क्योद्गीर्णत्वात् । ऋतं सत्यमिति ब्रह्मणो नाम । च श्रुतिः स्मृतिश्च ऋतमेकाक्षरं ब्रह्म । सत्यं ज्ञानमनन्तं ब्रह्मे ति । तत्रातिष्ठादित्यध्याहार्यम् । ते नाममर्थः ऋतं च सत्यं च अतिष्ठिदिति शेषः । अर्थात्सृष्टिपूर्वकाले तथा च सकलमन्धकारमयमासोदित्यर्थः । ततस्तदनन्तरं प्रलयावस्थायामेव रात्री अजायत रात्रिरासीत् । रात्रिशब्देन अन्धकार उच्यते । तथा च सकलमन्धकारमासीदित्यर्थः । तेजोमावस्यैवान्धकारत्वात् । रात्रिश्चन्द्राधीनत्वेन तदानीमसम्भवाच्चेतिभावः । तथा च स्मृतिः आसीदिदं ततोभूतमथ ज्ञातमलक्षणमिति । ततस्तदनन्तरं प्रलयावसानसृष्ट्यारम्भ समये तपसः अदृष्टात् समुद्रो जायत बभूव । तपसः किं भूतात् अभीद्धात् अभि सर्वतो भावेनइद्धात् सर्वलब्धवृत्ते रित्यर्थः । समुद्रः कि भूतः अर्णव. अर्ण पानीयं तदस्यास्तीति पानीयः यः समुद्र. स जात इत्यर्थः । प्रथमत. सकलसंसार सृष्टिनिमित्तं जलराशिरुत्पन्न इत्यभिप्रायः । तथा स्मृतिश्च । अपराव-ससर्जादाविति । ततस्तदनन्तरं अर्णवात्समुद्रादधिपश्चात धाता-विधाता । अजायत । धाता किं भूत मिषतः प्रकटीभूतो विश्वस्य वशी महाप्रलये विप्रलुप्तस्यास्य त्रिलोकस्य निर्माण प्रभुरित्यर्थः । स धाता यथापूर्व यथाक्रमेण सूर्याचन्द्रमसौ अकल्पयत् निर्मितवान् । किं भूतो नाजलमभित ।

Closing. तच्चक्षु: किं भूतमित्यपेक्षायामाह तच्चक्षुरिति तत्पूर्वं चक्षुः कीदृशं देवहित देवानां समीहितं कर्त्तुं पुनः किं भूतं चक्षुः शुक्लं

निर्मलं पुनः किं भूतं चक्षुः पुरस्तात् प्राच्यां दिशि उच्चरत् उद्गृच्छत् उदयत् तस्योपस्थानं कृत्वा वयं शरदः वर्षस्य शतं शत-वर्षाणि पश्येम एवं च शरदः शतं च जीवेम शरदः शतं श्रृणुयाम शरदः शतं प्रब्रुवाम प्रकर्षेण ब्रुवाम शरदः शतमदीनाः उद्भूताः स्याम किंचन केवल शरदः शतं किन्तु शरदः शतादपि भूयः अधिकं पश्येमेत्यादि सर्वत्रान्वेति तेजोसोति अस्यार्थः गायत्रीं स्तौति ।

त्वं तेजः असि शुक्रमसि अमृतमसि धाम गृहमसि नाम अभिधानमसि देवानामनाघृष्टमुत्कृष्टं प्रियं तत्वमेवासि देवयजनं देवा इज्यं तेऽनेनेति देवयजनं मन्त्रादि तत्त्वमेवासि ।

गायत्र्यसीति अस्यार्थः त्वं गायत्री असि गायन्तं त्रायते इति गायत्री एकपदी द्विपदी त्रिपदी चतुष्पदीति स्वरूपकथंन अपदासि न पद्यसे ज्ञापयति एतद्देवाह नहि पद्यसे किंच ते तुरीयाय पदाय स्वरूपाय ब्रह्मविष्णुशिवभिन्नाय ब्रह्मस्वरूपायेति यावत् यद्वा विराट् हिरण्यगर्भादिपकारणोपाधित्रयहीनाय ईशपदाय यद्वा वैखरीरूपाय व्याप्ताय नमः अस्त्विति शेषः पदाय किं भूताय दर्शिताय दर्शनीयाय ध्यानेनेति शेषः पुनः किं भूताय पदाय परो रजसो रजसः अपर भूताय शुद्धसत्वरूपायेत्यर्थः ।

Colophon ; इति शत्रुघ्नमिश्रविरचितायां मन्त्रार्थदीपिकायां सन्ध्यामन्त्र-व्याख्या समाप्ता ।

Post-Colophonic संवत् १९३१ का मिति पौष सुदि ११ रविवार लिखित रामानुजदास ।

+ + x

1286/30402 ललितार्चनकौमुदी

Opening : ।। श्रीगणेशाय नमः ।।

तत्र श्रीमान् साधको रजनीतुर्ययामे विबुद्ध्यावश्यकं कृत्वाह..........च प्रक्षाल्य धौते सवसीपरिधायाचम्य स्वासने समुपविश्य पूजामूर्त्तेर्निर्माल्यमपकृष्य प्रक्षाल्य स्वपुरतः संस्थाप्य पूर्वदिनपूजायाः शिष्ट पुष्पादिना वक्ष्यमाणं समस्तप्रकटेत्यादिन-समष्टिविद्यया त्रिरभ्यर्च्य कर्पूरशकलैर्दन्तधावन कारयित्वा सुगन्धिजलैर्गड्षं मुखं प्रक्षालनं सूक्ष्मवस्त्रेण करास्यप्रोच्छनं च कल्पयित्वा ब्रह्मरन्ध्रस्थश्वेतसहस्र दलकमलकर्णिकायां सिंहासने समुपविष्ट वामाङ्कगतया देव्यारक्तवर्णया रक्तवस्त्राभरण-भूषितया वामकरघृतलालाकमलया दक्षिणभुजेनालिङ्गितं श्वेत-वस्त्राभरणानुलेपन मुक्तादामादिभूषितं चन्द्रकान्तनिभ त्रिनेत्रं ज्ञानमुद्रापुस्तकवराभयकरं शान्त सुप्रसन्नं शिवरूपिण श्रीगुरुं ध्यात्वा तच्चरणारविन्दयुगलविगलतदमृतधाराभिः स्वदेहं परिप्लुतं विभाव्य प्रणवत्रितारमुच्चार्य वक्ष्यमाणश्रीगुरुपादुका विद्यांत श्रीअमुकानन्दनाथश्रीपादुकां पूजयामीति मानसैरुपचारैः सम्पूज्य :—

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे
विद्यावतारं संसिद्ध्यै स्वीकृतानेकविग्रह
नवायं नवरूपाय यमार्थैकरुपिणे
स्वतन्त्राय दयालुप्तविग्रहाय शिवात्मने ।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ।
विवेकानां विवेकाय विमर्शाय विमर्शिनां ।
प्रकाशानां।प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ।
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सदामच्चित्तरूपेण विधेहि भवदासनं ।

इति प्रणम्य हृन्मन्त्रेण स्वहृदि लयं भावयेत् । इति गुरुध्यानं विधाय स्वमूलाधारं चतुरस्रं वेष्ठितं वा दिशां त वर्णचतुष्टययुक्तचतुर्दलपङ्कजपीतवर्णं ध्यात्वा तत्कर्णिकायां सोमसूर्याग्निमयकथादित्रिरेखं कुलशृङ्गारं त्रिकोणं विभाव्य तन्मध्ये कोटिसूर्यप्रतीकाशं चन्द्रकोटिसुशीतलं जपाकुसुमप्रभं सत्वरजस्तमोगुणक्रान्तं कामाख्यं विंदुं विभाव्य तदूर्ध्वे कुण्डलिनीं शक्ति चिद्रूपामष्टत्रिंशत्कलायुक्तपञ्चाशद्वर्णविग्रहश्रीविद्यारूपिणीं तडित्कोटिप्रभादीप्तां विसतन्तुतनीयसीं प्रसुप्तभुजगीमिव सार्धत्रिवलयेन स्थितां स्वेच्छादण्डहतां कृत्वोत्थाप्य गुरूपदिष्टविधिना सुषम्ना= मार्गेण मूलाधारस्वाधिष्ठानमणिपूरकानाप्तविशुद्धाज्ञाख्यषट्चक्रभेदक्रमेण ब्रह्मरन्ध्रस्थितसहस्रदलकमलं प्रापप्य ततः स्रवदमृतधारया रक्तवर्णया वर्णमथ कुण्डलिनीं ता संतर्प्य पुन सुधास्रोतः स्वरूपिणीमकुलामृतप्लवेन सुषुम्णान्तर्गततत्तदाधार तत्र द्वां तु तत्तद्वर्णं तत्तदपि देवताः प्लावयन्तीमाज्ञाविशुद्धादिक्रमेण मूलाधारं नीत्वा तथैव स्थापयेदित्यारोहावरोहक्रमेण परां शक्तिं कुण्डलिनीं ध्यात्वा विद्याकूटत्रयं ध्यायेत् ।

Closing : सर्वसंक्षोभचक्रस्थाभ्यो गुप्ततरयोगिनोभ्यो नमः हृदये ४ है हं क्लीं स्रौः सर्वसौभाग्यदायकचक्रस्थाभ्यः सम्प्रदाययोगिनीभ्यो नमः विशुद्धौ ४ हस्रैं हक्लीं सौः सर्वार्थसाधकचक्रस्थाभ्य कुलकौलयोगिनीभ्यो नमः आज्ञायां ४ ह्रीं क्लीं क्ले सर्वरक्षाकरचक्रस्थाभ्यो विगर्भयोगिनीभ्यो नमः ललाटे ४ ह्रींश्रीं सौः सर्वरोगहरचक्रस्थाभ्यो रहस्य योगिनीभ्यो नमः शिरसि ४ ह्स्रौं ह्क्लीं ह्सौः सर्वासिद्धिप्रदचक्रस्थाभ्यः परापररहस्ययोगिनीभ्यो नमः ब्रह्मरन्ध्रे ४ मूलपञ्चदशीमुच्चार्य सर्वानन्दमयचक्रस्थाभ्यः परापरातिरहस्ययोगिन भ्यो नमः इति न्यास ४ समस्तप्रकटे सादियोगिनीसमष्टिविद्यया सर्वाङ्गे व्यापकं विन्यसेदिति प्रकटविन्यासः अथामटन्यास तत्र शिरसि ॐ सरस्वत्यै नमः ललाटे ह्रीं पार्वत्यै नमः दक्षनेत्रे

अंसचित्रनमः वामे मं अग्नये नमः मुखवृत्ते हूं चन्द्रमसे नमः मुखे श्रीं श्रियै नमः कपोलयोः स्वाहा दन्तिने नमः इत्यामट न्यासः अथैतन्न्यासः फलं त्रिकालं यस्त्रिवारं वां पञ्चवारं च सप्तधा कुर्यात् दशधा वाथ शृणु तस्य फलं शिवे कांतिमेधाय शः सौख्यसुख श्रीस्तस्य जायत इति ।

Colophon : (on 65th folio) इति श्रीमद्गोस्वामिजगन्निवासात्मजगोस्वामिशिरोमणि-भट्टविरचितायां ललितार्चनकौमुद्यां सप्तमः प्रकाशः ।

1287/30373 ललितार्चादीपिका

Opening : ।। श्रीगणेशाय नमः ।।

प्रणम्य श्रीपदाम्भोज सर्वेप्सितफलप्रदम् ।।
ललितार्चादीपिकेयं संक्षेपेण विरच्यते ।।१।।

तत्र साधकः प्रातरुत्थाय शुचिर्भूत्वा—

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।।
विद्यावतारससिद्ध्यै स्वीकृतानेकविग्रहः ।।
नवाय नवरूपाय परमार्थैकरूपिणे ।।
सर्वाज्ञानतमो भेद मानवे चिद्घनायते ।।
स्वतन्त्राय दयाक्लृप्तविग्रहाय शिवात्मने ।।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ।।
विवेकिनां विवेकाय विमर्शाय विमर्शिनां ।।
प्रकाशाय प्रकाशानां ज्ञानिनां ज्ञानरूपिणे ।।
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।।
सदा मच्चित्तरूपेण विधेहि भवदासनम् ।।

इति श्रीगुरुं नत्वा प्रणमेत् । तत. —

प्रातः प्रभृति सायांतं सायादि प्रातर ततः ।।
यत्करोमि जगद्योने तदस्तु तव पूजनम् ।।

इति पठित्वा बहिर्गत्वा यथाविधि शौचं कृत्वा क्लीं कामदेवाय सर्वजनप्रियाय नमः इति मन्त्रेण दन्तकाष्ठं विधाय नद्यादौ यथाविधि स्नात्वा तान्त्रिकसन्ध्यां कुर्यात् । सा यथा । मूलेन प्राणायामत्रयं ऋष्यादिकषडङ्गन्यासं च कृत्वा स्वपुरतो धेनुमुद्रया जलममृतीकृत्य तेन कुशैरकारादिक्षकारान्तैरेकपञ्चाशदक्षरैः सबिन्दुभिः स्वशिरः प्रोक्ष्य मूलेन च त्रिः प्रोक्ष्य ।ॐ ऐं ह्रीं श्रीं प्रथमकूटं आत्मतत्त्वं शोधयामि स्वाहा।४। द्वितीयं विद्यातत्त्वं शोध० ४ तृतीयं शिवतत्त्वं शोध०४।२। द्वितीयं विद्यातत्त्वं शो०प्रथमं आत्मतत्त्वं शो. पुनः समस्तविद्यया सर्वतत्त्वं शोधयामि स्वाहेत्याचम्य–प्रथमंकूटं वाग्भवेश्वरि विद्महे द्वितीय कामिनीश्व ! धीमहि तृतीयं तन्नः शक्तिः प्रचोदयात् । श्रीमहात्रिपुरसुन्दरीश्रीपादुकायै एषोऽर्घः। स्वाहेति त्रिरर्धं दत्वा । ह्रां ह्रीं सः श्री सूर्य एष तेऽर्घः स्वाहा। इत्यञ्जलित्रयं दत्वा मूलेन देवीं त्रिः सतर्प्य ४ प्रथमकूटमुच्चार्य त्रिपुराबागीश्वरी श्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य तुरीयगायत्रीं दशवारं जपित्वा ॐत्रिपुरे देवी विद्महे वाग्भवेश्वरि ! धीमहि तन्नो मुक्तिः प्रचोदयात् । इति गायत्रीं जपित्वा ऋष्यादिन्यासपूर्वकं मूलं जपित्वा श्रीगुरुं प्रणमेदिति प्रातःसन्ध्या ।

Closing : शेषिका श्रीपादुकां पूजयामि नम इति निर्माल्य पुष्पैस्त्रिः सम्पूज्य नैवेद्यस्य शतांशं सहस्रांशं वा समर्प्य बलिपात्रस्थमन्नाद्यमेकस्मिन् पात्रे कृत्वा पूजागृहाद् बहिश्चतुरस्रवृत्तत्रिकोणात्मकं मण्डलं कृत्वा ततोच्छिष्टभैरवं सम्पूज्य हें ह्रीं श्रीं उच्छिष्टभैरव एह्येहि बलिं गृहाण २ हुं फट् स्वाहा इति मन्त्रेण बलिं दत्वा हस्तपादं प्रक्षाल्यान्तः प्रविश्य स्वासने उपविश्य विशेषार्घपात्रमुद्धृत्य शिरसि श्रीगुरुं तर्पयामि नमः इति तत्पादुकां त्रिः संतर्प्य गन्धपुष्प-

क्षतान्वितजलेन ताम्रपात्रमापूर्य ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे नमः सवित्रे शुचये सवित्रे सर्वदायिने । ह्रां ह्रीं स श्री सूर्य एष तेऽर्घः स्वाहेति सूर्यायार्घं दत्वा प्रागुक्तगुरुस्तं त्र पठित्वा श्रींगुरुं प्रणम्य द्वितीयकूटेन निर्माल्यं शिरसि धृत्वा मूलेन चरणोदकं स्वीकृत्य सुखं विहरेदिति श्रीपरदेवतानित्ययजन-विधिः ॥१॥

Colophon : इति श्री गोस्वामिशिवानन्दापरनामकशिरोमणिभट्टविरचिता श्रीललितार्चादीपिकासम्पूर्णा ॥१॥ शुभं भूयात् ।

x x x x

1290/31359 शिवाराधन

Opening अथ शिवाराधनं विधानं संग्रहे तत्र लिङ्गपूजावश्यकता —

लैङ्गेद्भुक्योपचारेण स्थापयेत्परमेश्वरं ॥
पूजयेच्च विशेषेण लिङ्गं सर्वार्थ सिद्धये ॥१॥

सर्वलिङ्गमयं लोकं सर्वं लिङ्गे प्रतिष्ठितम् ।
तस्मात्सम्पूजयेल्लिङ्गं य्रं इच्छेत्सिद्धिमात्मन ॥२॥

ये वान्छन्ति महाभोगान् राज्य दिशालये ।
तेऽर्चयन्तु सदाकालं लिङ्गरूपं महेश्वरम् ॥३॥

न लिङ्गाराधनादन्यत्पुण्यं वेदचतुष्वंपि ।
विद्यते सर्वशास्त्राणां एष एव विनिश्चयः ॥४॥

सर्वमन्त्रं परित्यज्य कर्मजालमशेषतः ।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ॥६॥

अथ सर्वेषां तत्राधिकार तत्रैव शिवनारदसंवादे—

ब्राह्मणः क्षत्रियो वैश्य शूद्रो वाप्यनुलोमजः ।
पूजयेत्सततं लिङ्गं तत्तन्मन्त्रेण सादरम् ॥१॥

लैङ्गे दर्शनादर्चनात्तस्य लभन्ते ....नरा. ।
वन्दनान्मङ्गला वासि स्थापनाच्छाश्वतं पदम् ॥२॥

सर्वेषां वर्णानां विभोर्दिव्यं वपु शुभम् ।
पूजनीयं प्रयत्नेन सकलं निष्कल बित्रः ॥३॥

साकारं सकलं प्रोक्तं निराकारं तु निष्कलं ।
सकलं भावनायोग्यं योगिनामेव निष्कलम् ॥४॥

Closing : यथा प्रतिष्ठित लिङ्गं मन्त्रविद्भिर्यथाविधिः ।
तथा प्रभृतिशूद्रश्च योषिद्वापि न संस्पृशेद् ॥

काशीखण्डे च काशीलिङ्गानि प्रकृत्योक्तं—

अदृश्यान्यपि दृश्यानि दुःखस्थान्यपि च प्रिये ।
भग्नान्यपि च कालेन तानि पूज्यानि सुन्दरी ॥

अथ प्रतिष्ठाविचारसिद्धान्तशेखरे—

प्रतिष्ठां शिवलिङ्गस्य वक्षे नानागमोदिताम् ।
आचार्यैरुपदिष्टां च समासेन यथामति ।
पञ्चधा या शिवेनोक्ता प्रतिष्ठास्थापनं तत ।
स्थिति स्थापनमिष्येतत् त्रयमव्यक्तलिङ्गके ।
आस्थापनं तु सुव्यक्ते जीर्णेनुत्थापनं मतम् ।
लिङ्गब्रह्मशिलायोगः प्रतिष्ठामन्त्रसंस्कृतिः ॥१०८॥

लिङ्गबाणादिकं कृत्वा शतधा पञ्चधा त्रिधा ।
द्विधा वारोप्यते पीठे यत्र स्थापनमुच्यते ।
अभिन्नपिण्डकं लिंगं रत्नं वा लोहजादिकम् ।
त्रिधा संस्क्रियते मन्त्रैस्तत् स्थितिस्थापनं मतम् ।।११०।।

इति शिवस्थापनविचार: ।
श्रीलक्ष्मीनारायणो जयति भवानीश कार्यार्पणमस्तु ।।१०००१।।

x x x

1361/30181 गीतगोविन्द 'रसिकप्रिया' वृत्तियुत्

Opening :

।। श्रीगणेशाय नम : ।। भवानीशंकराभ्यां नम: ।।

कल्याणं कमलापतिर्दिशतु मे य: कौस्तुभे राधया,
वीक्ष्य स्वप्रतिबिम्बं तं प्रति युवत्येषेति तर्काकुलम् ।।
आश्लेषोन्मुखयापि मानपरयामन्वानया कैतवं,
तिर्यग्वक्रितकन्धरं विलितयामासूयमालोकित: ।।१।।

सो व्यान्मामरविन्दनाम उदयघनाभिपद्मालया,
पद्मापद्मविमीलमीलनविधिप्रावीण्यतन्नेत्रयो: ।
योगादर्धनिमीलितांबुजवशात्सम्भोगभोगेतरा-
वस्थाद्वन्द्वभवानुभूतिजनित: क्रीडासुखान्यन्वभूत् ।।२।।

दिश्यान्मेऽद्धं शिवातनु: स भगवान्नित्योदितां सपदं,
शम्भुर्विश्वजयश्रिय: परवशीकारैकसत्कार्मणं ।।
पत्रैकाङ्गनवीनविभ्रमरसादेकांगगुप्तेरच-
नास्वादान्सम्भवदद्भुतैकपरमाजागर्त्ति हैमौद्रिजा ।।३।।

नत्वा मतंगभरतप्रमुखान् सुगीतं
शास्त्रनिपुणान् जयदेववाचां ।।
श्रीकुम्भकर्णनृपतिः तनोति,
गानं विधाय सरसं रसिकप्रियाङ्काम् ।।४।।

इदानीं विद्वत्प्रार्थनाव्याजेन आत्मप्रशंसां तनुते । यद गान्धर्व-कलास्विति । हे सुधियः जयदेवकवेः तत्सर्वं श्रीगीतगोविन्दादेव शुद्धं जानन्तु । अत्र यद्यपि संख्यावान् पण्डित कविरिति एकार्थ-पर्यवसानोवित्वं तथापि विकर्तनस्तेमसामित्यादिवत् । पण्डितेष्वपि कविः क्रान्तदर्शी इति विशेषेणापर बोद्धव्यं । तदित्ति किं । यद् गान्धर्वकलासु कौशल गान्धर्वमार्गदेशीवित् तस्य कलां अगविवास नै चक्षिण्यादिकाः तत्र कौशलं । तत्र गान्धर्वस्य स्वरपदात्मकत्वेन मार्गत्वात् अत्रासम्मवित्वेपि केवलदेश्यां गान्धर्वशब्दप्रवृत्तिरुपचा-रवृत्त्या बोद्धत्येति सुस्थितं ।

Closing & Colophon :

स्थापनाचार्येण भूमण्डलखण्डलेन श्रीचित्रकूटविभुजा अत्यु-त्कृष्टतरनरेश्वरेण गजनरतुरगाधीशः राजत्रितयटोडरमल्लेन वेदमार्गस्थापनचतुराननेन या च कल्पनाकल्पद्रुमेण वसुन्धरोद्धर-णादिवराहणा जगदीश्वरा भुवनेश्वरा किंकरेण चरणा भवानी-पतिप्रसादपरिप्राप्ता हृद्यशालिना ऋणत्रयया करणकारणसक-लतीर्थाधिदैवतगयागतपवननिगडनिर्वासनेन त्रिजगती तापत्रयो-न्मूलन मूलहेतुना । महेन्द्रप्रमुखाभिनेयगताभिनयप्रपञ्चरचनाकर-तलकपितामलकफलवत् अविकलनयनकलमपथीकृतविश्ववस्तुना । वस्तुमती मण्डलमध्यवर्ति वा.................टोडरमल्लेन । नादेनेव मूर्तिमता चक्रचूडामणिना महाराजाश्रीअपूर्वदेवात्हृदयाधिनाथेन महाराजाधिराजमहाराणाकुम्भकर्णमहामहेन्द्रेण विरचितायां रसि-कप्रियानाम्न्यां श्रीगीतगोविन्दटीकायां द्वादशः सर्गः समाप्ति समगादिति ।

1425/30894 (1) प्रयोगविवेकसंग्रह

Opening: ।। श्रीगुरुभ्यो नमः ।। अर्हते नमः ।।

प्रयोगमिच्छताज्ञानु ज्ञेय कारकमादितः ।।
संज्ञया षड्विधभेदात्त्रविंशातिधा पुनः ।।१।।

तत्र पञ्चविध. कर्ता कर्म सप्तविधं भवेत् ।।
करणं द्विविधं चैव सम्प्रदानं त्रिधा मतम् ।।२।।

अपादान द्विधा चैव तथाधारश्चतुर्विध ।।
करोति कारकं सर्वं तत्स्वातन्त्र्यविवक्षया ।।३।।

तत्र कर्त्तर्यभिहिते प्रथमैव विधीयते ।।
तृतीया वाथवा (?) स्मृतानविहिते द्विधा ।।४।।

तथा कर्मण्यभिहिते विभक्ति विधिपूर्विका ।।
अनुक्ते प्रथमां हित्वा पञ्चमी सप्तमी तथा ।।५।।

तृतीया पञ्चमी चैव षष्ठी च करणे त्रिधा ।।
षष्ठी चतुर्थी तृतीया सम्प्रदाने तथा त्रिधा ।।६।।

पञ्चमी खल्वपादाने वर्तते न ततोन्यथा ।।
सप्तम्येवाधिकरणे कारकस्यैषसंग्रह ।।७।।

समासस्तद्धितस्तिङ् कृत्ते चत्वारोभिधायकाः ।।
त एवानभिसंबंधे भवन्त्यभिधायकाः ।।८।।

Closing: कः अथ ल्यप् तुमुन क्त्वा प्रत्यया क्व वर्त्तन्ते तत्राह भावे सोत्तरकालात् ल्यप् तुमुन् क्त्वा पूर्वकालजा इति अस्यायमर्थः इमे त्रयः प्रत्ययाः क्व वर्तन्ते पूर्वकालिका सोत्तरकालकाश्च भावे

वर्त्तन्ते न कर्मणि नापि कर्त्तरि कर्मणि प्रथमा तेषामित्ति कोऽर्थं तेषां ल्यप् तुमुन् क्त्वा प्रत्ययानां कर्मणि प्रथमा विधीयते ल्यपस्तावत् कटः प्रकृत्य इष्यते देवदत्तेन समानकर्त्तृकयोः पूर्व-काल इति क्त्वा समासे नञ् पूर्वे क्त्वो ल्यपादेशः उपपदमिति ङिति समास क्त्वात्तो सुन् कसुन् इत्यव्ययसज्ञा अव्ययादाप्-सुद् इति सुपोर्लुक् कसुन् यथा पुरा सूर्यस्योदयतोराधेय तुमुन् यथा ग्रामो गन्तुमिष्यत देवदत्तेन नुम्ण्वुलौ क्रियायां क्रियार्था-यामिति तुमुन् क्त्वा प्रत्ययो यथा कटः कृत्वा इष्यते राजा ल्यप् तुमुन् क्त्वा प्रत्ययाणां कर्मणि प्रथमैवविभक्तिरेका विधातव्या द्वितोया तु विशेषत इति कोऽर्थः कदाचित्प्रथमा उपादीयते। कदा-चिद्द्वितीया उदाहरणं ल्यप् तावत् ओदनं विपच्य गच्छति देवदत्तः तुमुन् यथा ओदनं भोक्तुं गच्छति देवदत्तः क्त्वा यथा पुत्रं दृष्ट्वा पुष्यति पुरुषः प्रकृत्यर्था ङानशौ पूर्वकाल इष्यते शतृ क्व काले वर्तते वर्तमानकाले शतृ ङानशौ भवतः आनश् प्रत्ययस्तु त्रिष्वपि भवति कर्त्तरि कर्मणि भावे च वर्तते शतृङ् तावत् कटं कुर्वत् देवदत्तः ओदनं पचति आनश् यथा श्लोकं पठमानो देवदत्तस्तुष्यति कर्म्मणि पुनः पच्यमानो ओदनो देवदत्तेन शोभते लक्षणहेतोः शतृङानशौ भक्तः किं शतृङानशाभ्यां समासः सिध्यति इत्यत आह द्रव्यसत्वपरत्वाभ्यां समासो न तु इष्यते कोर्थः उत्तरपदस्थितेन शतृङ् प्रत्ययेन समासो न भवति इति कथमवगम्यते द्रव्यतापर-त्वात् द्रव्यसत्ता परत्वाभ्यां समासो न भवति कटं कुर्वन् पच्यमान इत्यदोषः ।

Colophon : इति (वाररुचे प्रयोगविवेकसङ्ग्रहे) तृतीयपटलः समाप्त ।

Post-colophonic : लि जयवन्तसागरेण श्रीजयनगरे वाच्यमाना निनन्द्यु । मिति चैत्रसुदि १३ ।। तिथौ सम्वत्सर द्विरसवसुचन्द्रप्रमितेऽब्दे ।

× × ×

1426/31184 भूषणसारदर्पण

Opening : सकर्मकत्वस्याभ्युपगमात्सकर्मकधातु लक्षणे तत्प्रवेशेऽकर्मके तस्मिन्नतिव्याप्तेरप्रवेशे च न्यूनीकरणर्थे तत्रैवाव्याप्तिरित्यर्थः। यद्यपि तत्तदर्थविशिष्टानेवोक्तरीत्योपादाय सकर्मकत्वनिर्वचने दोषाभावस्स्थापि बहुलमेतन्निदर्शनमिति स्मरणात्तत्र तत्रावृत्करणाच्च तावद् धातूनां युगपद् ग्रहणसम्भवे तात्पर्यमिति बोध्यं ।। तदेतदिति पूर्वोक्तदूषणगणमित्यर्थः ।। ननु कृञोऽकर्मकतापत्तेरित्यस्य कृञो यत्नार्थकत्वनिरासप्रतिपादकस्य कथमुक्तार्थाभिसधायकत्वमित्याशङ्क्याभिसंधानप्रकारं विशदपत्ययं भाव इति । फलमात्रमिति । मात्रपदेन व्यापारव्यवच्छेदः । करोत्यादावित्यादिना सविषयार्थधातुसंग्रहः । तन्मात्रमिति । यत्नादिरूपविषयिमात्रमित्यर्थः । उक्तरीत्येति । उक्तप्रायरीत्या । सकर्मकधातुभिन्नधातत्वमित्याकारिकयेत्यर्थः । यथा श्रुते धातोर्व्यापारवाचकत्वे स्वार्थफलसमानाधिकरणव्यापारवाचकत्वरूपाकर्मकत्वापादानस्यासम्भवादुक्तिकत्वापत्तेः । नन्विदानीं धातुमात्रस्यैव व्यापारवाचकत्वस्यासिद्धत्वात् सकर्मकरूपप्रतियोग्यप्रसिद्धया भवदुक्तार्थापादानस्याप्यसम्भवदुक्तिकत्वं समानं । अन्यतमत्वरूपं तस्यतु स्वयमेव निराकृतत्वादुक्तपयेन तद्ग्रहणासम्भवादिति चेन्न । नयत्यादिद्विकर्मकाणां संयोगाद्यनुकूलाजादिनिष्ठक्रियात्मकफलार्थकत्वस्य धातोः फलमात्रार्थकत्ववादिनाप्यभ्युपगमादजादिनिष्ठक्रियायाः संयोगरुपफलजनकत्वाल्लोकप्रसिद्धेश्च व्यापारत्वात्तदर्थकधातू रम्यंतादिधात्त्वोपादायैव कथञ्चित्प्रसिद्धि संभवदिति अकर्मकतापत्तिरिति । उक्तलक्षणाक्रान्तत्वात्तस्येति भावः ।

Closing स्वपरप्रकाशमिति । तत्र स्वप्रकाशकत्वस्वभिन्नाप्रकाश्यत्वे सति त्वात्मकनित्यज्ञानविषयत्वं नित्यं विज्ञानमानंदं ब्रह्मे ति श्रुत्याब्रह्मणों नित्यज्ञानानन्दस्वरूपत्वप्रतिपादनात् प्रकृतश्रुतिस्वयमेवा-

मत्मनात्मानं वेत्थत्वं पुरुषोत्तमेति स्मृतिश्च। स्वप्रकाशत्वे परा-प्रकाश्यत्वे च नन्दो सयते सूर्य इत्यादिस्मृतिश्च मानमधिकमन्य-त्रानुसधेयं। सूचयतीति। स्फोटस्वप्रकाशपदयोः पर्य्यायत्वं बोधयतीत्यर्थः। तथा च जाति स्फोटवादिमते पयो प्रस्तथोपप्रादितं प्राक्। निर्विघ्नेति। अप्रतिबद् वस्त्रग्रन्थप्राचारार्थमित्यर्थः। अन्ते। ग्रन्थावसाने। मङ्गलउपाधिनिरासद्वारा शुद्धब्रह्मणः स्वप्रकाश-त्वरूपेण पुरुषार्थोपयोगिनि ज्ञाने व्याकरणस्योपयोग इति सिद्धम्। नादस्फोटवादिमते यथा पयो प्रस्तथोपपादितं प्राक्। निर्विघ्नेति। अप्रतिबद् वस्त्रग्रन्थप्राचारार्थमित्यथ। अन्ते। ग्रन्थावसानो मङ्ग-लमिति। नत्यात्मकं तदित्यर्थः। मङ्गलादीनि मङ्गलांतानि मङ्गलमध्यानि च शास्त्राणि प्रथयंत इति भाष्यकारोक्तश्रुतेरिति भावः। पूर्णत्वमखण्डानन्दत्वं। अप्रतिहतेच्छत्वं वा। तेन रूपेण तन्नतिश्च स्वोयग्रन्थप्रचारेच्छाविषयसिद्धयेति बोध्यं।

ज्ञात्वा श्रीफणिवाक्यजालमतुलं नैयायिकोक्तीरपि,
मीमांसानयमाकलय्य च मयाप्तमत्कृते दर्पणे ॥
अस्मिन्भूषणसारे तां बुधजनः सोत्कण्ठमालोकतां,
यन्निश्वासमलीयसो न मुकुरस्तत्वार्थबोधक्षमः ॥१॥

आसीत्कूर्मगिरौ धरासुरवरः श्रीवल्लभकोविदा,
वेदान्तेषु विनोदमंजरोरिति ख्यातास्ति यन्निर्मितिः ॥
तत्सूनुर्हरिवल्लभः समकरोति सद्युक्तिमण्युज्ज्वलं,
श्रीमद्भूषणसारदर्पणमिमम्मोदाय विद्यावताम् ॥२॥

उत्प्रेक्षितार्थो हि न मोदहेतवेभ्यस्तो भृशं सोऽपि बुधां तथैव ॥
इत्याकलय्योभयमन्त्रयुक्तिप्रमाणसिद्ध समुदाहृतं मया ॥३॥

सर्वोप्यर्थो बुधैः स्पृष्टो यद्यपीह तथापि मे।
तत्सन्दर्भाशेति वितता ममता केन वार्य्यते ॥४॥

Colophon : इति श्रीमत्कूर्माचलाभिजनोत्प्रभातीयोपनामकश्रीवल्लभात्मजहरिवल्लभविरचिते भूषणसारदर्पणे स्फोटवादः समाप्तः ।

Post-Colophonic संवत् १८६४ मिति ज्येष्ठ वदि ११ आदित्यवासरे लिखितं इदं पुस्तकं ।

× × ×

Opening :

1431/31232 सिद्धान्तरत्नाकर

श्रीगणेशाय नमः

श्रीमद्गुरुपदाम्भोजं नत्वा शब्दार्थसिद्धये ।
सरस्वत्युक्तसूत्राणां कुर्वे सिद्धान्तरत्नकम् ।।१।।

अइउऋलृसमानाः अइउऋलृ एते पञ्चवर्णाः समानसंज्ञा स्युः एऐओऔ सध्यक्षराणि एऐओऔ एते चत्वारो वर्णाः संध्यक्षरसंज्ञाः स्यु उभये स्वराः समानाः संध्यक्षराणि चोभये स्वरसंज्ञाः स्युः अवर्णानामि न अवर्णवर्णाः स्वरानामि संज्ञाः स्युः ह्रस्वः दीर्घप्लुतभेदाः सवर्णाः स्वराणां ह्रस्वदीघप्लुतभेदाः सवर्णाः अह्रस्वः आदीर्घ. आः ३ प्लुतः एवमिकारादीनामपि लृवर्णस्य दीर्घे न संध्यक्षराणां ह्रस्वो न ऋवर्णलृवणौ च सवर्णौ वक्तव्यौ हयवरल ञणङम झढधघभ जडदगब खफछठथ चटतकप आद्यंताभ्यां आद्यन्तवर्णाभ्यां गृह्यमाणामध्यवर्णा आद्यन्तसज्ञाः स्युः स्वस्यापि तस्य प्रत्याहारसंज्ञा तथाहि अकारबकाराभ्यां गृह्यमाणा मध्यवर्णा अबसंज्ञाः स अबप्रत्याहार अइउलृ एऐओऔ हयवरल

ञरानघम झढधघभ जडदगव इति एवं लजबचप इत्यादयोपि कार्यायित् कार्यायोच्चार्यमाणो वर्णा इत्सज्ञः स्यात् यस्येत्संज्ञा तस्य लोपः वर्णादर्शनलोपः वर्णविरोधो लोप श् प्रत्यादर्शनं लुक् स्वर-रहितहसौ हसाश्च संयोगसंज्ञाः स्युः कुचुटुतुपुवर्गाः अरेदो नामिनो गुणः अर्एओ एते गुणसंज्ञास्ते नामिनस्थाने भवन्ति आदौ ओ वृद्धिः आआर्एऔ एते वृद्धिसंज्ञास्ते च स्वराणां स्थाने स्युः अन्त्यस्वरादिष्टि अन्त्यस्वरस्तस्मात्परो वर्णश्च टि संज्ञः अन्त्या-त्पूर्वं उपधा अन्त्यवर्णात्पूर्वो वर्ण उपधासंज्ञः स्यात् ह्रस्वो लघुः दीर्घो गुरुः विसर्गानुस्वारसंयोगपरो ह्रस्वोपि गुरुः विभक्त्यन्तं पदं इति संज्ञाप्रक्रिया ।१।

Closing : चार्थे द्वन्द्वः इतरेतरयोगे समाहारे चार्थे द्वन्द्वसमासः स्यात् द्वन्द्वेऽल्पस्वरप्रधानेकारोकारान्तानां पूर्वनिपातः धवखदिरौ तापस-पर्वतौ अग्निवायू पतुगुप्तौ स्वराद्यदं तस्य च ईशकृष्णौ देवता द्वन्द्वे पूर्वपदस्यात्वं इन्द्रा बृहस्पती प्राणितूर्यसेनाङ्गानां द्वन्द्वः समा-हार एव समाहारे एकवद्भावः एकत्वे द्विगु द्वन्द्वौ नपुंसकलिङ्गौ स्तः दन्त्योष्ठं मार्गदिकः पाणविक रथिकाश्वारोहं बह्वसंख्यानां मृगशकुनि क्षुद्रजन्तू वनस्पत्यादीनां समाहारः रुरुपृषतं शुकवकं यूकालिक्षं वटपिप्पलं बदरामलक ब्रीहियवं कुशकाशं इति द्वन्द्वः समाहारे अतईय द्विगुः संख्यापूव्रपदे समाहारेर्थे द्विगुः समासः स्यात् ततोऽदंतादीप् पञ्चाग्निः क्वचिन्नेप त्रिभुवनं चतुर्युगं इति द्विगुः ४ बहुव्रीहिरन्यार्थे अन्यपदार्थे प्रधाने बहुव्रीहिसंज्ञः स्यात् बहुव्रीहौ विशेषणसप्तम्यन्तसंख्यासर्वादीनां पूर्वनिपातः बहुधनः भाललोचनः कृतकटः द्विपुत्रः सर्वप्रियः क्वचिन्न पद्मनाभ. दन्तजातः नञ् दुःसुभ्यः प्रजामेधयोरस अप्रजाः दुःप्रजा सुप्रजाः धर्मादन् सुधर्मा अन्यार्थ अन्यार्थे स्त्री प्रत्ययान्तस्य ह्रस्वः पुंवद्वा समासे समानाधिकरणे स्त्रीलिङ्गे परे पूर्वस्योक्तपुंस्कस्य पुंवत्स्यात्

रूपवद्भार्यः ग्रो प्रत्ययान्तस्य न वामोरुभार्यः ग्रन्यार्थे गोशब्दस्य ह्रस्वः स्यात् पञ्चगु इति वहुव्रीहिः ५

× × ×

1433/31064 तत्त्वदीपिका (पूर्वार्ध)

Opening.

।। श्रीपरमात्मने नमः ।।

प्रणम्य जगतां नाथं महेशं साम्बमव्ययम् ।
सिद्धान्तचन्द्रिकाव्याख्या क्रियते तत्त्वदीपिका ।।१।।

प्रारिप्सितनिरन्तरायपरिसमाप्तये विहितं मंगल शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते नमस्कृत्येत्यादिना ग्रहं रामाश्रमः वाणोप्रणीतसूत्राणां सिद्धान्तचन्द्रिकां कुर्वे किं कृत्वा महेशानं नमस्कृत्य पुनः पतञ्जलेर्मतं बुद्‌ध्वेत्यन्वयः नमो नतिं कृत्वेति नमस्कृत्य कृञः समासे क्यविति पूर्वे काले क्यप् ह्रस्ववस्येति तुक् वाचस्पत्यादित्वाद्विसर्गस्य सः नति क्रियाश्रयत्वेन महेशानस्य कर्मत्व ईष्ट ईतीशान ईश् ऐश्वर्ये शतृशानाविति शानप्रत्ययः शिति चतुर्वर्दिति चतुर्वत्वादंप् कर्त्तरी त्यप् तस्यादादरिती लुक् ईशाना. शिवादयो वहवः सन्ति तद् व्यावृत्यर्थं विशेषणं महांश्चासावीशानश्च महेशान सहादित्वान्महत ग्रालं सर्वापेक्षयोतमो यः परमेश्वरस्तं ग्रनेन व्याकरणस्य सिद्धान्तः सूचितः ध्वनिविशेषावच्छिन्नं ब्रह्मैव प्रतिपाद्यमिनि मन्यत इति मतं मतिबुद्धिपूजार्थेभ्यश्चेति वर्त्तमाने मन्यते कर्मणि तक् इच्छाविषयभूतंज्ञानविषय भूतं च बुद्धाज्ञात्वेत्यर्थ बुधः ग्रवगमने पूर्वकाले क्त्वा पूर्वकालत्व च क्त्वाक्यपो. कुर्वे क्रियापेक्षया खलेकापातन्यायेन द्वयास्तत्र सम्बन्ध विशेषणानां परस्परसंवधानभ्युपगमनात् ग्र ख्यातांतवाच्याया क्रियाया विशेष्यत्वस्वीकारात् पतञ्जलियस्मिन सर्वेषां नमस्कार्यत्वादिति

पतञ्जलिस्तस्य पतञ्जलेरिति मननक्रियापेक्षया कर्तृकार्ययोरिति कर्तरि षष्ठी नक्तादाविति निषधस्तु क्तस्य निषेधो नतु तक: अनेन प्रक्रियामात्रं दृष्ट्वायं ग्रन्थो न दूष्य: किन्तु भाष्यपर्यन्तं ज्ञात्वेति सूचित वणति वेदशब्दमुच्चारयतीति वणो ब्रह्मा वण-शब्दे पचाद्य: तस्येयं वा शक्तिर्वाणीसरस्वती देवतेद्मथ इत्यण-न्नण ईय् यद्वा वाण्यतीति सर्वान् जीवान् शब्दोच्चारणे प्रेरयतीति ण्यन्तात्पचाद्य नदादेरितीप् प्रादिस्थेति णत्वे कृते प्रणीतानि य: कर्मणि क्त: वाण्या प्रणीतानि वाणीप्रणीतानि अमादाविति तत्पुरुष: सीव्यन्तेन्तर्भाव्यन्ते स्वस्मिन्नर्थायैस्तानि सूत्राणि क्षिवु-तन्तुसंताने शिवेरुच्चेत्यौणादिक: ऋप्रत्यय. यद्वा सूत्रयन्ति वेष्ट-यन्ति अल्पाक्षरैर्बहूनर्थानिति सूत्राणि सूत्रवेष्टने चुरादि: पचाद्य: अल्पाक्षरैर्बह्वर्थसूचकानि वाणीप्रणीतानि च तानि सूत्राणि चेति कमधारयस्तेषां सबंधसामान्ये षष्ठी कुर्व इति ।

Closing

प्रीतिरहो करोति अत्र वीप्सायां द्वित्व अनेन द्वित्वे सिलुक् स्यात् कथं भीत भीत इव शात मयूख इति भारवि इव शब्देन सादृश्या-क्ततया सादृश्ये द्वित्वा योगात् सत्यं भीतेभ्यो भीत इति व्याख्येयं तेनातिभीत इति फल खिन्न: खिन्न: शिखरेषु पदन्यस्यगतासि यत्र क्षीण: क्षीण: परिलघुपय: श्रोतसां चोपभुज्येति मेघदूते एकस्य.पि खेदावस्थासु च भेदं प्रकलप्य वोप्सा बोध्या मन्द मन्दं नुदतोत्यत्र मन्दं स्वतो मंदं गामिनं मन्दंनुदतीत्यन्वयो बोध्य: क्रियासम-भिहारे पौन: पुन्ये भृशार्थे चे-यर्थ: कर्मव्यतिहार इति क्रिया विनिमय इत्यर्थ दलद्वय इत्यादि दलद्वय आवभाव आपा भाव अन्योन्यं परस्पर इत्यत्र दलद्वये व्याप् प्राप्तासनेत्यर्थ: अन्योन्य-मित्यत्र स्तवन्यादेरिति क्त प्राप्त सनेत्यर्थ: अन्योन्याश्रय इत्यत्र समासे लुक नेत्यर्थ: तद्धितप्रत्ययानामनन्तत्वात् कार्ष्ण्येनाभिधातु-मशक्यत्वादनुक्तसिद्ध्यर्थमाह शेषा इति ।

Colophon :

सिद्धान्तचन्द्रिकाव्याख्या यात्वियं तत्त्वदीपिका ।
तत्पूर्वार्द्धमभूत्पूर्णं तेन तुष्यतु पार्वती ।।१।।

श्रीरामकरपौत्रेण लोकेशकरशर्मणा ।
कृतायामिह टीकायां तद्धितव्याकृतिर्गता ।।२।।

इति लोकेशकरविरचितायां सिद्धान्तचन्द्रिकाव्याख्यायां तत्त्वदीपिकायां पूर्वार्द्धं समाप्तम् ।

× × ×

. 1489/31972 त्रिकाण्डशेष

Opening :

।। श्रीगणेशाय नमः ।।

जयन्ति सन्तः कुशलं प्रजानां नमो मुनीन्द्राय सुराः स्मृताः स्थ ।
स्तुताऽसि वाग्देवि दयस्व मातर्विधेहि विघ्नाधिय मङ्गलानि ।।१।।

अलौकिकत्वादमरः स्वकोषेन यानि नामानि समुल्लिलेख ।
विलोक्य तैरप्यधुना प्रचारमयं प्रयत्नः पुरुषोत्तमस्य ।।२।।

वर्गक्रमस्तथा नामलिङ्गयोस्तूपदेशता ।
परिभाषादिकं सर्वमत्राप्यमरकोषवत् ।।३।।

स्वर्लोको देवलोकस्यादवरोहः फलोदयः ।
मन्दरः सैरिभः शक्रभवनं खं दिवं नभः ।।४।।

स्वाहा भुजस्तुवसुलाः पूजिताश्च चिरायुषः ।
शौभानि लिंपाद्युषदः स्वर्गिणश्च नभः सदः ।।५।।

क्षनामा त्वदितिर्देवमाता स्यादथपूर्वजा ।
पितरश्चन्द्रगोलस्था न्यस्तशस्त्राः स्वधाभुजः ।।६।।

कव्यवालादयस्ते च दैत्यास्तु प्रघसा: खरा: ।
ऋतुद्विषश्चेष्टिमुषो दैत्यमातादितिर्दनु ।।७।।

बुद्धोकनिष्टगमहामुनि धर्मचक्र,
रागाशनित्रिशरणा ख समो दशार्ह ।
तापि गुणाकरमहासुखवज्रिणश्च,
मैत्रीवला समजितारिसमन्तभद्रा ।।८।।

महाबोधिधर्मधातु श्वेतकेतुर्जिन खजित ।
त्रिमूर्त्तिर्दशभूमीश: पञ्चज्ञानो बहुक्षय: ।६।।

सबुद्ध: करुणोऽकूर्च: सर्वदर्शी महावल: ।
विश्वबोधो धर्मकाय: सगुप्तोर्हन् सुनिश्चित: ।।१०।.

व्योमाभो द्वादशाख्यश्च वीतराग: सुभाषित: ।
सर्वार्थसिद्धस्तु महाश्रमण: कलिशासन: । ११।।

गोपेशरश्चा स्थाप्य यशोधरे यो वाहुल: सुत: ।
देवदत्तोऽनुजोथ स्यु: श्रावका शिष्यसज्ञिन: ।।१२।।

प्रत्येकबुद्धा खड्गास्युसुदांताश्चैकचारिण: ।
स्वयम्भुवोथ मारीचो त्रिमुखा वज्रकालिका ।।१३।।

वल्मीकवाह्लीकवृषणद्रोणगाण्डीव निगडानि च ।
मुकुलादि च विज्ञेयं शिष्टसन्दर्भतोपरं ।।१४।।

अथस्त्रीनपुंसयो: केलिर्मणिर्योनिर्मसिर्मुनि: ।
मरीचि: शाल्मलि: स्वाति: श्रेणिर्मुष्टिस्तिथि: सृणि ।।१५।।

उर्मिर्गभस्तिरशनिर्वैपार्ष्णि युधिराशय: ।
वस्तिश्च किष्कुकंदुश्च वेश्वतन्निम्बवाहव: ।।१६।।

गण्डूषगर्जजागरभज कलिज्वालवर्त्तकक्रीडा ।
उत्कण्ठसटवराटकरभसाः स्त्रीत्वे तुटावंता ॥१८॥

शल्लकोः वृश्चिक कीटः शारस्तूणो घटः कटः ।
शफरो वेतसश्चामी स्त्रियां ङ्यन्ताः प्रकीर्त्तिताः ॥१९॥

स्त्रीक्लोवयोरुडुर्दामाच्छर्दिज्योतिस्सदोर्च्चिषः ।
सुखं लक्षं वणिज्य...... वडिशक्रोऽपाटलं ॥२०॥

तारकं रसनं नीतमेते टावंतकाः स्त्रियाम् ।
ङ्कन्तास्तु नगरास्थान स्थलानि पुरपाटलम् ॥२१॥

त्रिलिङ्ग्यांतु प्रतिसरस्फुलिङ्गनखरार्गलाः ॥
कन्दरं शृङ्खलं नालं वल्लूरफलमुस्तका ॥२२॥

जंभश्च टावता एते स्त्रियामथ निभीतकः ॥
हरीतकाटकतट कवाठाश्च गुणे वटः ॥२३॥

मंडलं शलभं भल्लात कंकलशकन्दलौ ॥
मृणालामलकौ दाडिमश्च ङ्यन्ताः स्त्रियामिमे ॥२४॥

करणे ल्युट् त्रिषु यथा तस्य व्याख्यानमित्पदः ॥
सूत्रकृद्भाष्यकृत्कोशावनुमान इतीच्छति ॥२५॥

इति लिङ्गादिसंग्रहवर्गः ।

दृष्टप्रयोगा ये शब्दाः प्रायस्ते इहकीर्त्तिताः ।
प्रयुक्तास्तु पाणिन्यादिषु दृष्ट्वाप्युपेक्षिताः ॥

Colophon. इति श्रीपुरुषोत्तमदेवविरचितस्त्रिकाण्डशेषाभिधानकोषः समाप्तः

× × ×

1490/30202 देशीयशब्दसंग्रह-वृत्ति

Opening : ।। श्रीगणेशाय नमः ।।

अर्हंदेर्शादुर्भा प्रायः सन्दर्भितापि दुर्वो आचार्यहेमचन्द्रस्तं त्वां संदभति विभजति वा । समग्रशब्दानामनुशासने विकीर्षिति स संस्कृतादिभाषाणं । शब्दानुशासने सिद्धहेमचन्द्रनाम्नि सिद्धिरूपनिबद्धा इदानीं लोपेगमवर्णविकारादिना क्रमेण पूर्वै रसाधिन पूर्वा दिश्याः शब्दा अवशिष्यन्ति तत्संग्रहार्थमयमारभ्यः तत्रादौ शिष्ट समय इति अधिष्ठातृदेवता नमास्क्रियते । गमण यपमाणगहि रासहि यर्याह अयहि ययंगम रहस्सा । जयइ जिणि दाण असेस भास परिणामि णीवाणी । न याचं एकादशग्राहिण-स्याद्वादारोधिनो इति प्रायशिशेषाः निगमसग्रहव्यवहार तु सूत्र-शब्दसमभिरेवंभूताभिघानाः । सप्तप्रमाणानि स्याद्वादगोचराणि प्रत्यवतादीनि नैतंर्गभीरा मंदबुद्धी नामस्ताद्या । अतएव सहृदयं हृदयं येषां हृदयङ्गमरहस्या । अतएव जयतिशेषतीथंकभाषो-त्कर्षेण वर्त्तते । जयत्यर्थेन च नमस्कार आक्षिप्यते । अयममपरः अकर्षः यदशेषभाषारूपत्वेन परिणमते यदाह । देवा देवीं नरा नारीं शबराश्चापि शादरीं तियां वापिहितैरश्चामिनिरे भगवन्त-गिरं एवंभूत जिनेन्द्राणामर्हन्तां वाणी जयतीति संबंधः ।

Closing : यदाह भरतः । अङ्गुल्यः संहिताः सर्वा सहाङ्गुष्ठेन यस्य तु । तथा सतु सर्पसिगः करः । होरणं वस्त्र । यथा हे लुक्क हेलुअ मुहें डुल्लहि ए होरणं वलविग्रालो । हेरिम्वं पूअंती अबा बाले करेइ हेयालां । अथानेकार्थाः । तत्रह्रं दिविषा दविकल्प-पश्चात्तपनिश्चयसत्यग्रहणार्थेषु । हारक्षपसंभाषणरतिकलहेषु एतौ प्राकृतलक्षणे निपातेषूक्ताविति नोक्तौ ।

Colophon : इत्याचार्य श्रीहेमचन्द्रविरचितायां स्वोपज्ञरत्नावलीनाम देशीयशब्दसंग्रहवृत्तिः षष्टमो वर्गः ।

Post-colophonic : ग्रन्थाग्रं ३७५ । सर्वग्रन्थसंख्या ३४७१ । शुभं भवतु । संवत् १८२६ कार्त्तिक सुदि १५ सोमवासरे लिखितं उपाद्धिया विहारीलाल ज्ञाति पोहकरणा । श्रीरस्तु ।

× × ×

1495/31971 हारावली

Opening : ।। श्रीगणेशाय नमः ।।

भजगपतिविमुक्तस्वच्छनिर्मोकवल्ली,
विलसितं मनु कुर्वन्यस्य गङ्गाप्रवाहः ।
शिरसि सरसभास्वन्मालती दायलक्ष्मीं,
लघयति हिमगौररसोऽस्तु वस्साध्यसिध्यै ।।१।।

कल्पावसानसमये स्थितये कवीनां,
देहान्तरं किमपि या सृजति प्रसन्ना ।
यस्याः प्रसादपरमाणुरपि प्रतिष्ठा-
मभ्येति कामपि नमामि सरस्वतीं ताम् ।।२।।

निर्मत्सरास्सुकृतिनः खलु ये विविच्य,
कर्णे गुणस्य कणमप्यवतंसयन्ति ।
येषां मनो न रमते परदोषवादे,
ते केचिदेव विरलाभुवि संचरन्ति ।।३।।

मुक्ता मयातिमधुरा मसृणावदान,
छायाधिरागतरलामलसद्‌गुणश्रीः ।
साध्वी सतां भजतु कण्ठमसौ प्रियेव,
हारावली विरचिता पुरुषोत्तमेन ।।४।।

किन्नैव सन्ति सुधियामभिधानकोषाः
किंतु प्रसिद्धविषयव्यवहारभाजः ।
गोष्ठीषु वादपरमोहफलासु केषां,
हारावली न विदधाति विदग्धिमानं ।।५।।

Closing

काव्यादीनामनंतत्वाच्छब्दादीनां विशेषतः ।
क्व कदा केन किं दृष्टमिति को वेदितुं क्षमः ।।२७१।।

अतः शब्दः क्व दृष्टोऽयमर्थतश्चापि कीदृशः ।
इति काव्यमलोकं स्यान्मात्सर्य्यमलिनात्मनाम् ।।२७२।।

शब्दार्णव उत्पालनी संसारावर्त्त इत्यपि ।
कोषा वाचस्पतिव्याडिविक्रमादित्यनिर्मिताः ।।२७३।।

आदाय सारमेतेषामन्येषां च विशेषतः ।
हारावली निर्म्मितेयं मया द्वादशवत्सरैः ।।२७४।।

उपास्य सर्वज्ञमनन्तमीशं भूत्वा तिथिः श्रीधृतिसिंहवाचाम् ।
हारावलीद्वादशमासमानैर्विनिर्मितेयं पुरुषोत्तमेन ।।२७५।।

नानाकाव्यपुराणनाटककथाकोषेतिहासस्मृति-
ज्योतिश्शास्त्रगजाश्वमानवभिषक्कोषान्प्रयत्नादियम् ।
दृष्ट्वान्यानि च शाब्दिकैस्सह कृता हारावली यत्नतः
कर्त्तव्योऽत्र न संशयस्सुमनश्शब्दार्थलिङ्गेष्वतः ।।२७६।।

सुधियाजनमेजयेन पलाद्धृतिसिंहेन समं निरूपितेयम् ।

विदितो वहु........श्वभिः कवीन्द्रैर्भुवि कोषानुमतः श्रमो-
मदीयः ।।२७७।।

हित्वा महाशाब्दिकताभिमानं मात्सर्यमन्यत्र मुहुर्निधाय ।
हारावलीं यः प्रकरोति कण्ठे विदग्धगोष्ठीषु परं
स भाति ।।२७८।।

Colophon : इति श्रीशाब्दिकमहामहोपाध्यायपुरुषोत्तमदेवप्रणीता हारावली पर्यवसिता । सम्पूर्णं ।।

× × ×

1502/31150 कविकल्पलता

Opening ।। श्रीशक्ति गणेशाय नमः ।।

गङ्गावारिभिरुक्षिताः फणिफणैरुत्पल्लवा
तच्छिखारत्नैः कोरकिताः सुधांशुकतया स्मरैकपुष्पश्रियः ।
आनन्दाश्रुपरिप्लुताक्षिहुतभुग्धूमैर्मिलद्-
दोहदानाल्पं कल्पलताःफलंददतु वोभीष्टं जटा धूर्जटेः ।।१।

मालवेन्द्रमहामात्यश्रीमद्वाग्भटनंदनः
देवेश्वरः प्रतनुते कविकल्पलतामिमाम् ।।२।।

प्रतिभाभावितात्मानः कवित्वं केन कुर्वते ।।
अन्यत्र कविताधानकुशलाः विरलाः पुनः ।।३।।

यदन्यैर्वर्त्मनक्षुरां तत्र संचरतो मम ।।
पदे प्रसवलतः संतः सन्त्ववलम्बनम् ।।४।।

कविशिक्षा शतं वीक्ष्य कवीन्द्रानुजीत्य च ।। '
निबद्धेयं मया धीरा त्वरितश्लोकसिद्धये ।।५।।

सुवृत्तरम्यस्तबका सदा परिशीलता ।।
कविकल्पलता सेयममला परिशील्यता ।।६।।

शब्दश्लेषकथाख्याश्चत्वारस्तबका इह ।।
ते चतुः पञ्चषट्सप्तकुसुमैरन्विताः क्रमात् ।।७।।

तत्राद्यस्तबके छन्दोभ्यासः सामान्यशब्दकः ।
वर्ण्यस्थितिरनुप्रासः कुसुमानि यथाक्रमम् ॥८॥

Closing : निःसर्गसारस्वतसंभृतानि सूक्तानि मुक्तामणिकोमलानि ।
भवन्त्यमुख्या तदेषा द्वेषादुपेक्ष्य न विचक्षणेन ॥

स्वधेनुदुग्धं सत्रयांसि वचोभि ।
वाणी मंजीरमजुलनिनादसहोदराणि ॥
एतां निषेव्यः कवयः कवितामृताभिः ।
विद्वन्सभासु सविलासमुदीरयव्वम् ॥

मदकलकलकण्ठी केलिनादानुवादाः ।
परिणतसहकारास्वादसंयोजभाजेः ॥
अभिनवमधुवारावंधवः काव्यवंधा ।
विधुतविधुरुचोऽस्याः सेवयाविर्भवंति ॥

सर्वं विनश्यति विहाय कवित्वमेकं ।
कायेन साकमिति कास्य नहि प्रसिद्धम् ॥
एतद्विमृश्य कविकल्पलतासु एवं ।
काव्यसंपत्तये सुकविभिः सततं निषेव्यां ॥

आविःकृतावसुमतीवलयेश्वरेण ।
देवेश्वरेण कविना कविनायकेन ॥
काव्यज्ञमानसमुदे सकलार्थसूतिः ।
सत्सूनगुच्छकविकल्पलता विभूयात् ॥

Colophon : इति श्रीवाग्भटसूनुमहाकविश्रीदेवेन्द्रविरचिता कविकल्पलता समाप्ता ।

x x x x

1504/30751 काव्यकल्पलता

Opening : काव्यस्य छन्दो मूलत्वात् । प्रथमं छन्दः सिद्धिप्रतानस्तत्र पूर्वमनुष्टप् शासनं । यथा । आदौ साध्यपद स्थाप्यं । आदौ प्रथमं । साध्यमवश्यप्रयोज्यं पदं कार्यं । एकाक्षरादीनि साध्यपदानि ।यथा। श्रीः लक्ष्मीः कमला । जलधिजा । दुग्धाब्धिपुत्री । दुग्धाब्धितनया । दुग्धाम्भोनिधिपुत्री । दुग्धाम्भोनिधिसम्भूता । एकादि द्विलघुद्वयात् । एको ह्रस्वो दोर्घो वा । वर्णं आदौ ययोस्तौ एकादीद्विलघू यत्र पदे तत् एकादिद्विलघुपद । जलधिजा वारिधिजादिद्वयात् । वर्णद्वयात्। स्थाप्यं । यथा। असौ जलधिजा देवी। इयं वारिधिजादेवी ह्रस्वादिद्विलघुपदस्यादौ द्विलघुगुरुलघु प्रयोज्यै । यथा । इह जलधिजादेवी अत्र जलधिजादेवी पञ्चाक्षरं समासे एकविभक्तिभ्रंशि निस्वरपञ्चाक्षरं पदं । कुमारपाल । क्षीराब्धिपुत्री प्रभृतिसमासे केन वा विभक्तिभ्रंशहेतु वा पुरस्थे । स्वरेण वा स्थाप्यं । यथा । कुमारपाल भूपालः । क्षीराब्धिपुत्रिका सेयं । कुमारपालको राजा कुमारपाल उल्लासीस्या चतुः पञ्च षट् ह्रस्वं प्रांते विषमपादयोः चतुर्ह्रस्वाक्षरं पदं । दशरथाधिकं । पञ्चह्रस्वाक्षरं पदं । कमलवनादिकं । षट् ह्रस्वाक्षरं पदं । प्रथमतृतीयपादयोः प्रांते चतुर्द्विवर्णेभ्यः प्रायः सर्वगुरुभ्यो निश्चितांतगुरुभ्यो वा परतः । प्रयोज्यं ।

Closing : जन्मस्नात्रे जिनेशस्य मेरौ देवाङ्गनामुखैः ।
पतितः स्फुरितैः शङ्के शतचन्द्रनभस्तलम् ।।६०।।

युद्धक्रुद्धभटछिन्नकुंभिकुम्भस्थलोद्गतैः ।।
मुक्ताकणगणैः शंके दिवातारकिते नभः ।।६१।।

इत्यादि । तद्गुणाधिक्येन । इति चतुः श्लोको परिशेषपदं । पदार्थस्य गुणादधिकगुणपदार्थेन समस्या पूर्यते । यथा ।

त्रिलोक्यां स्फुरत शुद्धयश सः पुरस्तथा ।।
सापि विश्वंभरा नाथा सोमः श्यामवपुर्बभौ ।।६२।।

तद्गुणाधिकं यश सद्गाम्भीर्यगुणस्याग्रे समुद्रो गाः ।।
पदायते सन्मान् शशि राजानं गगनं भ्रमरायते ।।३३।।

एवमौचित्येन तद्गुणाधिकत्वमारोप्यम् ।

Colophon : इति श्रीजिनदत्तसूरिशिष्यमहापण्डितचक्रचूडामणि-श्रीमदमरचंद्रविरचितायां काव्यकल्पलताकविशिक्षावृत्तौ अर्थसि-द्धिप्रताने चतुर्थे समस्यास्तबकः सप्तमः समाप्तः । ग्रन्थाग्रे० १४५

× × ×

1509/31221 चन्द्रालोक-सुधाव्याख्यायुत

Opening : ।। श्रीगणेशाय नमः ।।

उच्चैरस्यतिमदतामरसतां जाग्रत्कलंकैरवध्वं
संह्रस्तयते च या सुमनसामुल्लासिनी मानसे ।।
युष्टोद्यन्मदनाशनार्चिरमला लोकत्रयीदर्शिका,
सा नेत्रत्रितयीव खण्डपरशोर्वाग्देवता दीव्यतु ।।१।।

टीका—

अधिसरयूनदीतटमधिसाकेतां गणमाधिनरुद्यानं ।
खेलन्नीरदनोलो बालो मे मानसे सदा भूयात् ।।१।।

अनेकै क्लेशैर्यन्न परिचितमद्यापि गहन,
परिहासस्तस्मिन्मम भवति यत्नस्य तदपि ।
यशोदाकौशल्यातनयपदभावाहितमनः
प्रसाद क्लेशानां फलति फलममत्युत्कटमपि ।।२।।

सूनोर्दिनकरस्यैषा गागाभट्टमनीषिणः ।
चन्द्रालोकस्य विवृतौ कृतिरस्तु सतां मुदे ।।३।।

राकागमे नावदातो रसिकानन्दकरणम् ।
चन्द्रालोकनिबन्धोऽयं चन्द्रालोक इवापरः ।।४।।

विघ्नविघानाय कृतं समुचितेष्टदेवतास्मरणरूपं मंगलं शिष्यशिक्षायैव्याख्यातृश्रोतृणामनुषंगतो मंगलाय च निबध्नाति खण्डपरशोर्महादेवस्य सूर्यचंद्राग्निरूपनेत्रत्रितयीव वाग्देवता दोव्यतु सर्वोत्कर्षेण वर्त्तताम् क्रीडतां मोदतां वा । नेत्रपक्षे मंदानि नि.-प्रभानि तामरसानि कमलानि तेषां भावमुच्चेरस्यति दूरीकरोति कमलनिष्ठमंदतां दूरीकरोतीत्यर्थः सूर्यस्य पद्मविकासकत्वादिति भावः । जाग्रत्यः स्फुरत्यः कला यस्मिन् कर्मणिकैरध्वंसं कुमुदाना नाश हस्तयते हस्तान्निरसत इति वार्त्तिकाणि च निरस्यति दूरी-करोति चन्द्रस्य तद्विकासकत्वात् । सुमनसां देवानां सकलदेवानां शंभुपूजकत्वात् अमृतभक्षकत्वाच्च दुष्टः उद्यन्मदनः कामस्तमश्नाति तादृशमर्चिरग्निरूपनेत्रस्य मदनदाहकत्वात् वाग्देवतापक्षे मंदतां मूर्खतामरसतारसाभावमुच्चैरष्यति दूरीकरोति । जाग्रत्कलङ्कैः प्रकटदोषैर्यो वरध्वंसोवनाभावस्तमपाकरोति सुमनसां पण्डितानां दुष्टः उद्यन्यो मदस्तन्नाशने अर्चिर्ज्वालेव लोकत्रयीदर्शिका त्रिलोकी-वर्णनक्षमेति ।।१।।

Cloosing : तद्धेतोरिति नयेनानुपूर्व्या एव संसर्गज्ञाने हेतु नास्तु कृतं संसर्गरूपेण स्थानेन अतो नाद्या अंते किं तद्ज्ञानं कवर्णमात्र पदमात्रं न तावद् घटकर्मत्वमित्याद्यावपि तदुत्पत्त्यापत्तेः अतः आनुपूर्वा घातामेव तदुत्पादकत्वं वाच्यं तत्र वाक्तोदोषः न च. सर्वानुपपत्तिपरिहारायंकोध्वनिः पदवाक्याभिव्यज्य इति वाच्यं अनेकतः तद् वाक्याभिव्यञ्जकानां तद्ध्वनिव्य-क्तिताभीष्टवैशांत्यानंतस्फोटकल्पनमपेक्ष्यते सिद्धानुपूर्वाज्ञानस्य

हेतुतामात्रकल्पने लाघवात् यदनित्यता नादनयेपि शक्तिपदस्यैव नित्यत्वासाधुत्वावकघटकर्मयोः संसर्गस्यानुपूर्वाविशेष लभ्यत्वाङ्गीकारे बाधकाभावात् श्येनकाक्या शक्तिपूरूपवाक्यस्फोटनिशसे नन्विताभिधाने वादो लक्षणावादश्चापरास्तः विवृत्तौतत् प्रथममयूखे स्पष्टीकृतं चात्रेति नानाशक्त्येभिनिवेष्टयं सुधोभिः पीयूषेति । सुधानिधानसुधास्तां न प्राप्तं चन्द्रालोकग्रंथेन मनोहरमासाद्य प्राप्य मुदं प्रातश्रयत्वमाश्रयध्वमित्यर्थः ॥५॥

जयंतीति जयदेवस्य पीयूषवर्ष
इतिमातरं महादेव इति पूर्ववत् ॥
गागाभट्टकविता चन्द्रालोकसमाश्रया
मयूखे दशमे श्रांता चंद्रवचः सुधा ॥१॥

Closing:

वाजवहा दुश्चन्द्रस्याशीर्दानार्चनादिभिर्बहुधा ॥
अन्ये कुर्वन्तु सेवां गागाभट्टस्य कृतिरियं सेवा ॥२॥

स्तुवन्त्वन्ये ग्रंथ ग्रथनमयि दित्वंयिपरे
महाराजस्तुष्येदयमपि न तुष्येदयि परं ॥
परंचिन्मुद्राया विघटनसमर्थो न च,
सहस्रमणो यस्तुष्येदथ जनकजायापरिवृढः ॥३॥

Colophon : इति मीमांसकभट्टदिनकरसूनुविश्वेश्वरापरनामकगागाभट्टकृतचन्द्रालोकालङ्कारटीकायां सुधाख्यायां दशमो मयूखः ॥१०॥ इतिश्रीकविपीयूषवर्षविरचितश्चन्द्रालोकः सटीकः समाप्तः ॥ शुभं भवतु ॥श्री॥

× × ×

1513/31318 वृत्तिदीपिका

Opening :

।। श्रीगणेशाय नमः ।।

ध्यात्वा व्यासं गुरुं नत्वा माधवेन्दुसरस्वतीम् ।।
मौनिश्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ।।१।।

इह सकलजनाभिलषितमोक्षमुख्योपायात्मतत्त्वज्ञानस्य तत्व-मस्यादिमहावाक्यार्थबोधजन्यत्वाच्छाब्दबोधे च वृत्तिग्रहजन्योप-स्थितेर्हेतुत्वाद् वृत्तिः निरूप्यते सा च त्रिधाशक्तिर्लक्षणाव्यंजना च वृत्तित्वं च शाब्दबोधहेतुशब्दार्थोपस्थित्यनुकूलशब्द तदर्थसंबंधत्वं संकेतविशेषसंबंधे न वृत्तिपदवत्वं वाऽत्र शक्तिः कः पदार्थ इति चेत् संकेतजन्यग्रहविषयमभिधानामपदार्थान्तरमिति मीमांसकाः संकेतश्च एतत् पदजन्यत्वप्रकारतानिरूपित एतदर्थबोधविशेष्यता-शालीश्वरेच्छा नैयायिकास्तु लाघवात् संकेत एवाभिधानतु पदार्था-न्तर न च गगरीत्यादिशब्दा अपि अभिधायकाः स्युः तथा च न म्लेच्छिपेक्ष्याः द्विगुश्चेति सूत्रविहितसंज्ञात्वमेव द्विगुत्वां यत्तु संज्ञाविषयान्यत्वे सति संख्यावाचकपूर्वपदकतुल्याधिकरणसमासो द्विगुः तद्धितार्थेऽभिधे ये यथा पञ्चकपालः उक्तार्थत्वान्न तद्धित-प्रत्ययः तद्विषये मथा पञ्चनायितिः अत्र समासे न तद्धितार्थान-भिधाना तद्धितप्रत्ययः इत्याहुर्जयरामादयः ।

Closing :

अतएव भाष्यकारप्राभाकरभट्टानां वर्णेषु नित्यत्वव्यवहारः एवं च मेलनासंभवादिति पूर्वोक्तं दूषणप्रशस्तं नन्वस्तु वर्णानां नित्यत्वं तथापि फलाभावा तदतिरिक्तः स्फोटो न स्वोक्रियत इति चेत् न तदेवेदं घटपटं तदेवेदं वाक्यमेकं पदमेकं नित्यबाधितप्रतीत्या तत्सिद्धिः अन्यथाघटपटादीनामवयवातिरिक्तावयव्यसिद्धिप्रसंगः न चेष्टापत्तिः मत्सिद्धान्तभङ्गापत्तेः इत्थं निरूपिताः पंचव्यक्ति-स्फोटाः वोपदेवेन तु शक्ततावच्छेदिका जातिरेव वाचिकेत्युक्तां

जातिश्च विधिः को धर्मविशेषः तथा च वर्णजातिस्फोटः पदजातिस्फोटः वाक्यजातिस्फोट इति तन्यते स्फोटत्रयं ।।

Colophon
इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ।

Post-colophonic :
संवत् १८७३ शाके १७३८ आषाढ कृ १ चन्द्रे श्रीरस्तु लिखतं शिवनाथभट्टेन ।

1601/31166 ज्योतिषरत्नमाला-विवरणयुता

Opening :
।। श्रीगणेशाय नमः ।।

प्रणम्य भानुं त्रिजगन्मयस्यमशेषसर्गस्थितिनाशहेतुम् ।।
दैवज्ञबोधाय मृदुस्फुटार्था व्याख्यायते ज्योतिषरत्नमाला ।।१।।

श्रामसर्मप्रसादेन्दुविवृद्धिमतिवारिभिः ।।
महार्घां विवृणोम्येषः रत्नमालामनन्तराम् ।।२।।

अत्र सतां तावदयमाचारोः यत् प्रवृक्तृश्रोत्रध्येतृणामात्मनश्चाशेषान्तरायो समायेष्टदेवतानमस्कारं विदधाति । तदयमपि कस्य एवं श पुण्डरोक खण्डमार्त्तण्डो दैवज्ञचूडामणि केशवस्य पौत्रो ज्योतिःशास्त्रसमुद्रदृष्टपारस्य गणकगणवंदितपदद्वयस्य श्रीमन्नागदेवस्य सूनुः ज्योतिःशास्त्रमहार्णवस्य तरणे अवगाहने मंदराद्रिः । पाने कुम्भोद्भवो निर्माणे प्रजापतिः । अंतर्निवासे यथार्थनामा समस्तमौहूर्त्तिकचक्रशिरो मुकुट..................कांतिनीराजितपदद्वंद्वो महाकारुणिकः ।। श्रीश्रीपतिनामा केशवस्य पौत्रो ग्रहगणितपाटीगणितबीजगणित ....तंत्रशास्त्रस्य ज्योतिःशास्त्रवनस्पतेः । संहितैव फलानीत्यवधार्यजातिकर्मनामकरणमौञ्जीबंधन..........यात्रादौ गर्गादिसंहिताभिर्विस्तीर्णस्थूलत्वात् प्रतिदिवसमायास्य मानमानसं दैवज्ञनिवहर्मवेक्ष्यं संजात..............।

Closing : भ्रात: शब्द कोमलार्थः सखे इदानींतन विप्रमात्र निर्मित्तशास्त्रमेतदसारस्यादिति । मावज्ञां कार्षीः । यतो मुनिः प्रणीतशास्त्रव्यतिरेकेण मया किमपि नोक्तमस्तीति तदेवमुच्यते । वरमेतन्नामापि नाग्रहीः । नन्वज्ञा कलुषो भूत्वा उपहासं कुरुयोति तस्मान्मुहूर्त्तं दौर्जन्यं दूरीकृत्य सौजन्यमाश्रित्य स्वप्रज्ञाविवृद्धये वा स्वल्पमपि मदीय शास्त्रमवलोकयसि । तदापरिविशेषपरिज्ञानस्तवत्यपक्रुमेव न रोचिषीतीति भद्रम् ।

शश्वद्वाक्यप्रमाणप्रवणपदुमतेर्वेदवेदाङ्गवेतुः,
सूनुश्रीलूणिगस्याच्युतचरणनतिः श्रीमहादेवनामा ।।
तत्प्रोक्ते रत्नमालारुचिरविवरणे सज्जनानां भोजमानौ,
स्वर्मानौ दुर्जनेन्दोः प्रकरणमत्सरस्थापनं विंशमेतत् ।।२०।।

यावन्मेरुगिरीन्द्रपङ्कजमिलासंस्थं नमः षट्पदम्
भूयिष्ठामलवारकोच्चयमृषंच्छीतंसु हंसान्वितम् ।।
उद्यद्वालसहश्च रश्मरुणरुकूकिञ्जलकमत्यद्भुतं,
तावद्वाङ्मयरत्नमेतदद्यं नदत्वनेंदाचिराम् ।।

शरवसुशशिमिते १८५ शककाले नभसितचतुर्थ्यां मिन्दुपुत्रस्य वारे निजमितिपरिणामान्तत्तनूजेन तेनविवृत्तिकिल श्रीश्रीपतिप्रोक्तशास्त्रं सम्पूर्णं कृतं ।

Colophon ; इति श्रीमहादेवविरचितं रत्नमालाविवरणं समाप्तम् । श्रीयोस्तु

Post-colophonic : संवत १७३५ वर्षे ग्रासू सुदि २ रवौ लिखितं । कल्याण भूयात् ।

याद्दशं पुस्तकं द्दष्ट्वा ताद्दशं लिखितं मया ।
यदिशुद्धमशुद्धं वा मम दोषो न दीयते ।।श्री।।

× × × ×

1629/31582 नीलकण्ठीयभुवनकोशविरोधसमाधानविचार

Opening.

।। श्रीगणेशाय नमः ।।

श्रीनीलकण्ठं नत्वादौ पुरुषार्थचतुर्धरं ।
व्यासदैवज्ञमतयोरैक्योक्त्यर्थो विचार्यते ।।१।।

टीका -

केनचित्किञ्चिज्ज्ञेन महच्छिष्येण व्यासमतं पुराणं दैवज्ञमतं ज्योतिषसिद्धान्तः नयोरैक्योक्तिः भारतभाष्यकारभणिता सा यथा प्रणम्य श्रीकृष्णं मुनिमखिलपौराणिकगुरुं प्रवक्ष्ये रोदस्यो-स्तदभिमतमाकारममलं यथा शृंगौन्नत्यप्रमुखमुपपद्येत सकलं यथा वेदव्यासव्यवहृतिविरोधश्च न भवेत ।।१।। वेदव्यासः पुराणं व्यवहृतिर्गणकशास्त्रं तयोर्विरोधो यथा न भवेत् तथा प्रवक्ष्य इत्यारभ्य इति संक्षिप्तपौराणसौरसिद्धान्तमार्गयोः भूगोलविषये साम्यं वर्णितिं बुधतुष्टये १८ इत्यंतेन ग्रन्थेनाष्टादक्षश्लोकैरुक्ता अस्या अर्थो विचार्यते तदभिप्राय ज्ञातु यत्नः क्रियत इत्यर्थः ।

Closing :

दशरथात्मजयुग्मनिरीक्षणक्षणसमाकुलबुद्धिधरियं दधौ । उभयकूलसमस्थित शाद्वलभ्रमगमागमखिन्नगवीदशामिति अतः पृच्छामि अत्रोत्तरं किं विदितं भवद्भिस्तद् ब्रुतं मे संशयभेदि-वाक्यं त्वदन्य। संशयस्यास्यछेतानत्युपपद्यत इत्यलमत्यज्ञान-प्रकटनेनेति नतिः ।

देशे मालवनामकेत्र नगरी भूपालनाम्नी शुभा
तस्या अतिशिहूरनामकपुरीयस्यामजं ठाग्रणीः ।
विल्किन्सन्निति साहिबो विजयते तस्याश्रितानां सभा-
मध्येऽभूत्स्म विचारएष कृपया संशोधनीयो बुधैः ।। नंदभूत-गिरि चन्द्रसंमिते शालिवाहनशकेऽयने शुभे राधमासि सितसप्तमी भृगौ सन्मुदे लिखितमस्तु पुस्तकं ।

Colophon : इति श्रीनीलकण्ठीयभुवनकोशविरोधसमाधानविचारः समाप्तः श्रीरस्तु । छ।।छ।।छ।।

1630/3539 नीलकण्ठीवृत्ति (वर्षतन्त्र)

Opening : ।। श्रीगणेशाय नमः ।।

यत्पादपद्मसुरसिद्धहंत्या अभीष्टसिद्ध्यै प्रणमामि नित्यम् ।
त विघ्नराजं मनसा स्मरामि भक्तप्रिय भागमुखं गणेशम् ।।१।।

गोदावरीतटे भाति गोलग्रामेति सुन्दरः ।
तत्रावसन् पूर्वजा मे सिद्धान्ताम्बुजभावनः ।।२।।

अनेकविद्याकुशलैर्द्विजेन्द्रैः संसेवितो भूमितले प्रसिद्धः ।
दिवाकरो दैवविदां वरिष्ठो वेदान्तशास्त्राभिरुचिर्बभूव ।।३।।

तस्यात्मजा पञ्चगुणैरुपेता जाता अमीषां प्रथमस्तु कृष्णः ।
दैवज्ञर्षयः सकलागमज्ञो विश्वेशपादाब्जरतो नितान्तम् ।।४।।

तस्यात्मजौ ख्यातशिरोमणी तौ
यौ विष्णुमल्लार्यभिधौ पृथिव्याम् ।
त्रिस्कन्धपारङ्गमल्लौ श्रीकेशवस्याग्रजनी प्रसिद्धौ ।।५।।

तस्यानुजो गणितविह्वणताग्रशंयो
मल्लारसेवनसमुद्गतशास्त्रपव्यः ।
सच्छास्त्रबुद्धिसुहृदां च महाशरव्यः
श्रीविश्वनाथगणकः सुतरां चकास्ति ।।६।।

आसीन्नाम्ना नीलकण्ठो द्विजाद्यो
ज्योतिः सिन्धोर्भारदृग्भाष्यवेत्ता ।
तेनोद्दिष्टे वर्षवन्त्रे करोति
टीका सम्यक् विश्वनाथो विविच्य ।।७।।

Closing : अथान्यदाह लग्नास्तनाथाविति लग्नास्तनाथौ लग्नसप्तम-स्वामिनौ केन्द्रस्थौ लग्नचतुर्थदशमानि एतदन्यतमस्थानस्थितौ

विवलौ निर्बलौ तदा मृगया क्लेशदायिनी उक्ता कथिता पुनः यदि तौ वीर्याढ्यौ बलिष्ठौ तदा मृगया शुभफला ।।२।। अथ भोजनचिन्ता लग्नाधिप इति लग्नस्वामी भोज्यदाता भाजनदाता सुखेशः चतुर्थथानस्त्रामी भोज्यं भोजनवस्तु ईरित उक्तं मदयः सप्तमस्थानस्वामो बुभुक्षा भोक्तुमिच्छा कर्मपतिर्दशमस्थान-स्वामो भोजनकर्त्ता इति विचिन्तयेत् विचारयेत् ।१। अथान्यदाह लग्नस्तनाथाविति लग्नास्तनाथौ लग्नसप्तमस्वामिनौ केन्द्रस्थौ लग्नचतुर्थदशमानि एतदन्यतमस्थानस्थितौ विवलौ निबलौ तदा मृगया क्लेशदायिनी उक्ता कथिता पुनः यदि तौ इति स्पष्टार्थं दुःखितावपि भोजनप्राप्तिसंभवज्ञानेपि अकस्मात्सुभोजन-प्राप्तिः ।।२।। अथान्यदाह मन्द इति स्पष्टार्थं ।।३।। अन्यदाह रवे दृष्टमिति स्पष्टार्थं ।।४।। अन्यदाह चन्द्र इति स्पष्टार्थं ।।५।। अथान्यदाह स्निग्धमन्नमिति स्पष्टार्थं ।।६।। अथान्यदाह सूर्या-दिभिरिति स्पष्टार्थः । ।।७।। चरादिगेस्यादिति सुखे चर राशौ सति असकृत् वारंवारस्थितराशि गते सति सकृदेकवारं स्वभाव-राशिगत सते द्विद्विवारं भोजनं स्यादित्यर्थ अथान्यदाह मूल-त्रिकोणग इति यस्मिन् खेटे मूलत्रिकोणस्थलग्नस्थे सति पितृगृहे भोजनं अन्यत्स्पष्टं ।।८।। अथान्यदाह शुभेक्षितयुत इति स्पष्टार्थं ।।९।। अथान्यदाह तिलान्नमिति स्पष्टार्थम् ।।१०।। अथान्यदाह शुक्र इति स्पष्टार्थं ।।११।। अथान्यदाह सूर्यमूलमिति स्पष्टार्थम् ।।१२।। अथ स्वप्नः लग्नांश इति लग्नांशये लग्नस्यांशस्वामिनि अर्के सूर्ये तनुगे लग्नगे सति अथवा अस्मिन्नपि बलार्के लग्नस्थे सति दु.स्वप्नं ईक्षते पश्यति अर्कबिम्बमित्यादि स्पष्टं ।।१३।। स्त्रियमिति स्पष्टार्थम् ।।१४।। सद्बन्धुसंग इति स्पष्टार्थम् ।।१५।। अथालङ्कारः आसोदिति स्पष्ट ।।१६।। तदात्मज इति स्पष्टं ।।१७।। पद्मां वपेति स्पष्टं । १८।।

Colophon : इतिश्रीदिवाकरात्मजविश्वनाथदैवज्ञविरचितायां नीलकण्ठी-टीकायां वर्षतन्त्रः सद्मविचारः समाप्तः ।

1638/31103 महादेवीसारणी-दीपिकावृत्तियुता

Opening ; ।। श्रीगणेशाय नमः ।।

श्रीनाभेयं जिनं नत्वा श्रीगुरोः पादपुष्करम् ।
वाग्देवीं तपनादींश्च हेरंबं भुवनेश्वरीम् ।।१।।

महादेवोक्तसारिण्या ग्रहाणां विदधाम्यहम् ।
वृत्तिशास्त्रानुसारेण दैवज्ञानां सुखाप्तये ।।२।।

तत्र तावदभीष्टदेवतानमस्कारपूर्वकं मंगलाचरणं कुर्वन् शास्त्रकृदिन्द्रवज्रावसन्ततिलकावृत्तेनाह ।

सिद्धिं करोतीशजकेन्द्रभौर्वी-
नादीन् शिवो क्षेत्रपवाग्गुरुन् स्वान् ।
चक्रेश्वरारब्धनभश्चराशु-
सिद्धं महादेव ऋषींश्च नत्वा ।।१।।
पैतामहार्यभटजिष्णुजभास्करादि-
सिद्धान्तभेदकरणं नितरामगाधे ।
संख्यार्णवे खेचरकर्मजले निमग्न-
ज्योतिर्विदां प्रतरणाय दृढोरु नावः ।।२।।

अनयोर्व्याख्या महादेवः चक्रेश्वरारब्धनभश्चराशुसिद्धेः सिद्धि करोति महादेवो नाम द्विजः चक्रेश्वरनामाचार्येणारब्धाया नभश्चराणां ग्रहाणामाशुसिद्धिः शीघ्रसिद्धिः सा अपरिपूर्णस्थितितायाः तस्याः सिद्धिं पूर्णतां करोति । किं कृत्वा । ईशजकेन्द्रभोर्वीनादीन्नत्वा । ईशाज्जातः ईशजः गणपतिः कः ब्रह्मा इन्दुः विष्णुः भानि नक्षत्राणि उर्वी पृथ्वी । इनः

सूर्यः आदिशब्दाच्चन्द्रादीन्मत्वा नमस्कृत्य च पुनः शिवौ नत्वा शिवा च शिवश्च शिवौ । द्वन्द्वसमासत्वादत्रापि आदिपदलोपः पार्वतीशङ्करौ प्रणम्य च पुनः स्वान् क्षत्रपवाग्गुरुन् स्वकीयान् क्षेत्रपालवाग्देवीगुरुन्नत्वा । च पुनः ऋषीन्नत्वा किं विशिष्टाया: चक्रेश्वरारब्धनभश्चराशुसिद्धेः खचरकर्मजले संख्यार्णवे निमग्न-ज्योतिर्विदां प्रतरणाय दृढोरुनावः खचराणां ग्रहाणां षट्कर्म असकृन्मन्दकर्म शीघ्रकर्मादिक तदेव जलं यत्र एतादृशे संख्यार्णवे गणितसमुद्रे निमग्नाः पतिता ये ज्योतिर्विदः तेषां प्रतरणाय तत्तुं दृढा सुबद्धा उरुस्थूला महती नौ वेडा तद्रुपा विद्यते ।

Closing: अथ वृत्तिकारः स्वाभिधानपूर्वकं शार्दूलविक्रीडितवृत्त-चतुष्केनाह-

वर्षे नेत्रनवांगभू (१५९२) परिमिते ज्येष्ठस्य पक्षे,
सितेष्टम्यां सद्गुणपृथुमनरयुते पद्मावतीपत्तने ।
राजाद्युत्कटवैरिनागदमनो राष्ट्रौडुवंशोद्भवः,
श्रीमान्गजसिंहभूपतिः स्वस्ति श्रीमरो मण्डले ॥१॥

जैने शासन एवमञ्चलिकगणे सत्सज्जनैः संस्तुते,
कल्याणोदधिसूरयः शुभकरा नन्दन्तु भूमण्डले तत् ।
सेवाकरभोजराजगणको ये विद्वद्वरा वाचका,
आसन् सर्वसुधामनः कमलिनीसंबोधने मानवः ॥२॥

खेटानां हि पुरा कृता बुधमहादेवेन या सारणी,
तस्यां दैवविदां सुखार्थजननीं वृत्तिं च सद्विस्तरम् ।
तच्छिष्यो धनराज एवमकरोद्वर्षेण बह्वादरै-,
र्बह्वर्थैः सहितां च पण्डितपदाप्तश्च प्रसत्ते गुरौ ॥३॥

बाणे...... लाशतसंख्यकाः पुनरनुष्टुप्छन्दसा,
तन्मितिर्यावन्मेरुमहीध्र्ुवस्थिरतरा खे पुष्पदन्तौ ।
स्थितौ तावत्तिष्ठतु दीपकेति सततं नाम्नी हि वृत्तिस्त्वयं
तद्ज्ञाता च सुखाप्तये सुमतिना धार्या गुरोर्भावतः ।।४।।

Colophon : इतिश्री महादेवीदीपिकावृत्तिः सामाप्ता ।

Post-colophonic : संवत् १८५९ भाद्रपद कृष्ण ४ भौमवासरे लिपिकृतं पुस्तकं पातालेश्वरप्रसादाद्दीर्घायुरस्तु पाठकानाम् ।

\+ \+ \+

1651/31394 मुहूर्त्तमलयाधर

Opening : ।। श्रीगणेशाय नमः ।।

अथ वस्तालयः (डेरो)

वेश्मगृहे प्रकर्त्तव्यं पक्षे ऊर्धगते विधौ ।
गुरु च भृगुवारेषु रविवारे प्रकीर्त्तितम् ।।१।।

तिथौ नंदा जया पूर्णा प्रशस्तं सौम्यलग्नतः ।।
नूतने वा प्रकर्त्तव्यं राजायां सुखमादिशेत् ।। २ ।।

रविभं चन्द्रम् यावत् प्रकर्त्तव्यं त्रिकत्रिकम् ।।
सुखं मृत्युः च विज्ञेयं गणनीयः पुनः पुन. ।। ३ ।।

रविभा प्रथमं पूर्वे कर्त्तव्यं सृष्टिमार्गतः ।।
एवं चैव प्रकर्त्तव्यं चिन्तनीयं बुधैः सह ।। ४ ।।

Closing : मासस्याश्विनतो हि षड्भि पूरतो सुश्रावणो माधवः;
भद्रापूर्णत्रयोदशितिथिरवौ शुक्रेन्दुजीवेन्दुसु ।
रोहिण्यूत्तरशाक्तशङ्करमरुत् तिथ्यं द्विदैवाश्विनी,
विष्णुचन्द्रः बलेऽथ लग्नपतये प्रारम्भमन्त्रार्थदः ।।१।।

प्रासादमण्डपगृहे यदि यज्ञशालां,
गुण्यं क्रमात् रसरसस्य दिशाक्रमेण,
शीर्षे त्रिकं च शुभदं जयपूर्वभागे ।
याम्ये प्रतीचिमरणे शुभं चोत्तरायाम् ॥१॥

इति धवलगृहे एडानु मुहूर्तं । अथधरनाभोभ । रविभात् चन्द्रभं यावत् गणनीयं त्रिकं त्रिकं । अशुभानिशुभा ज्ञेया भौमचक्र विर्निदिशेत् ।

× + +

1653/31564 मुहूर्त्तमार्त्तण्ड 'मार्त्तण्डवल्लभा' टीकायुत

Opening : ॥ श्रीगजाननाय नमो नमः ॥

॥ श्रीकुलदेवतायै नमः ॥ श्रीगुरुभ्यो नमः ॥

मार्त्तण्डोवतु वाचं नः पादैर्जाड्यतमोहरः ।
वृत्तबद्धतनुः सेव्योऽभीष्टदो विश्वलोचनः ॥१॥

अर्थद्वयावाची । तत्र प्रथम सूर्यपक्षे । मार्त्तण्डः श्रीसूर्यः नोस्मा्कं वाचमवतु रक्षतु । किं लक्षणः मार्त्तण्डः वृत्तबद्धतनुः वृत्ते मण्डले बद्धा तनुर्येन सः । तथा च स्मृति । स शङ्खचक्रं रविमण्डले स्थितं कुशेशयाक्रान्तमनन्तमच्युतमित्यादि ॥ श्रुति-रपि । य एष ये तस्मिन् मण्डले पुरुषः सोऽग्निरित्यादि ॥ पुनः किं भूतः पादैर्जाड्यतमोहरः । पादैर्किरणैर्जाड्यं पातकं शीतं वा तमोन्धकारस्तद्धरतीति तथा । पुनः कथभूतः सेव्यः सेवितुं योग्यः ।अभीष्टफलान्दातृत्वात् । पुनः किं लक्षणः विश्वलोचनः प्रकाशकत्वात् । विश्वत्वोच्यतेयनेति । विश्वं लोकं लोचनं चक्षुः ग्रहेश्वर इत्यादि यत्हृदये उक्तत्वात् । अथ ग्रन्थपक्षे । मार्त्तण्डो मुहूर्तमार्त्तण्ड नो वाचमवतु । किं लक्षणः वृत्तबद्धतनुः । वृत्तानि

प्रहर्षिणीशार्दूलविक्रीडितादीनि । तैर्बद्धा तनुर्यस्य स तथा । पुनः कथंभूतः पादैर्जाड्यतमोहरः । पादैर्वृत्तचरणैर्जाड्य मूर्खत्वं तदेव तमस्तद्धरतीति तथा । पुनः कथंभूतः । सेव्यो निरन्तरं पठनीय इत्यर्थः । पुनः किं लक्षणोभीष्टदः । यथोक्तं । मुहूर्त्ते कृत्यकरणा-दभीष्टार्थसिद्धाकारीत्यर्थः । पुनः किं लक्षणो विश्वलोचनः समप्रकाशकत्वात् । मुहूर्त्तमार्त्तण्डे सर्वे टीकां मार्त्तण्डवल्लभां इयमाकल्यमेतेन दिव्यः द्विप्राश्यवेस्म ।। २ ।। इह शास्त्रे तावत् संबंधाभिधेयप्रयोजनान्युच्यन्ते । आब्रह्मादिनिःसृतमिदं वेदाङ्गत्व-मिति संबंधः । उक्तं नारदमुनिना स्वसंहितायां । वेदस्य निर्मलं चक्षुः ज्योतिः शास्त्रमुत्तमम् । अस्य शास्त्रस्य संबंधो वेदाङ्ग-मिति धातृत इति । अत्राप्युक्तं पूर्वं वाग्न्यार्थमादाय यथोपचरितो लघुः इति । त्याज्य नक्षत्राद्यर्तुलग्नगोचरगर्भाधानविवाहसंस्कारा ग्न्याधानवास्तुयात्राभिज्ञानध्यायपल्लीग्रहगोचरसंत्यान्तिकथनमभि-धेयः तथा च नारदः ।। अभिधेयं च जगतः शुभाशुभनिरूपणमिति ।

Closing : तस्मिन्तानि वृत्तानि तैर्निबद्धः कृतो यो मार्त्तण्डस्तमेनं मार्त्तण्डो यो नरः पठति स विश्वपूज्यो भवति न केवलं विश्वपूज्यो भवति अपितु बह्वायुः सुखधनमित्रपुत्रत्यान् संप्राप्नोति सुमूहूर्त्तदानात् साधितकार्यस्य विश्वपूज्योऽस्तीति युक्तं जनानां यथार्थमुहूर्त्तदानात् कार्यसिद्धिलक्षणजनितपुण्येन बह्वापुरादीनि सम्प्राप्नोति युक्तं अथ मुहूर्त्तमार्त्तण्डे यद्गर्भाधानादिष युक्तं तत्रापि वहुसंहिताग्रन्था-नये भूत्वादविकलधीस्त्व युक्तं यत एव तीर्थसिद्धं प्राप्नोति तीर्थ-शास्त्रं तस्य सिद्धिस्ता अल्पग्रन्थेन बह्वर्थसिद्धे यद्वा गुरुः तीर्थसि-द्धिः शास्त्रौपलक्षणं यद्वा तीर्थयागस्तेन कृत्या यागमुखादिलक्ष-णसिद्धिः तासां प्राप्नोति तीर्थशास्त्रोध्वरक्षयो याध्यायामंत्रिस्थिति विश्वः । अथग्रन्थस्याशिषमनुष्टुमाह-

कृत त्र्यङ्ककेन्द्रप्रमिते वर्षे (१४९३) शालवाहनजन्मत;

वयसि मार्त्तण्डोऽयमल जयतूद्गमे कृतत्र्यङ्कंति शालवाहनजन्मतः त्र्यंकेन्द्रप्रमिते १४९३ वर्षेवयसिपद्ये मार्त्तण्डो मुहूर्त्त मार्त्तण्डः कृतः नामैकत्रेदेशग्रणो नामग्रहणं अयमुद्‌गतौ मार्त्तण्डो अलं अतिशयेन जयतु यद्वा यमलं मार्त्तण्डं उद्‌गमं उद्‌गतं उदयप्राप्तं जयतु सर्वोत्कर्षेणास्तु यथैतद् ग्रन्थाङ्कीकरणा बुधप्रार्थनापूर्ववाक्यार्थमादाय ग्रन्थोयं रचितो लघुः पठनार्थमशक्तानामङ्गीकार्यो बुधैर्मुदा ।

Colophon : इति श्रीमुहूर्त्तमार्त्तण्डटीकायां मार्त्तण्डवल्लभायां मुहूर्त्तमार्त्तण्डालङ्कारप्रकरणं समाप्तम् ।

Post-colophonic : अश्विन वद्य द्वादशी गुरु सत १२३२ श्लोकसंख्या ३०७५ श्रीरामार्पणमस्तु लिखितं मनराघन पाराशर स्वार्थं परार्थं वा श्रीशास्त्रीढुंढिराजसाहिवसदरअमी निमित्यार्थं कृष्णहेत कृष्णहेत कृष्णार्पण ।श्री।श्री।श्री।श्री।श्री।श्री।। इति श्रीमुहूर्त्तमार्त्तण्डसमाप्तः । शुभमस्तु । मि० माघ सु० ११ श्रीसंवत् १९१० मु० जबलपुर ।

× × ×

1655/31734(1) मुहूर्त्त रत्नावली

Opening : अथ मूहूर्त्त प्रकरण लिख्यते-

पौष्णाश्विरोहिणीसौम्ये पुष्यमैत्र्योत्तरासु च ।
ज्येष्ठायां श्रवणे राज्ञामभिषेकं तु कारयेत् ।।१।।

उत्तरा त्रयरोहिण्यां ध्रुव चैव चतुष्टयम् ।
गृहरामाभिषेकानि स्थिरं कृष्यादि कारयेत् ।।२।।

मार्त्तण्डधात्रीतनयैर्बलिष्ठै गुर्विन्दुशुक्रै स्फुरदंशुजालैः ।
विलग्नजन्मे स दशाधिनाथैर्महीपतीनामभिषेक इष्टा ॥३॥

इति राज्याभिषेकमुहूर्त्त :—

मृगे पुष्येनुराधा च हस्तचित्राध्रुवाश्विनी ।
श्रवणादिद्वयं जेष्ठा दर्शने भूपते सुखाम् ॥४॥

इति राज्ञदर्शनमुहूर्त्तः—

राजकर्मकृतां राज्ञां गजवृद्धिकरं स्मृतम् ।
हस्तचित्राश्विनीस्वाति पुष्ये व पुनर्वसौ ॥५॥

Closing : अथद्विरागमनं–

पूषां पुष्यपुनर्वसूत्तरमृगात्रामैश्वहस्तत्रयं,
रोहिण्या श्रवणत्रयं द्विरागमविधौ मूलाधनिष्ठास्तथा ।
कुम्भाजालिरविस्ववर्षभसमं तिक्ताकुजार्कीतुला,
कन्यामन्मथमीनयुक्तः मकराः लग्नानि यात्रातिथि ॥१९९॥

अथ पुंसवनः–

मूलादित्यद्विराश्विनीकरत्रयं श्रवणत्रयं मैत्रेषु.
रेवत्यां च मृगे गुरुदिनकरे भौमेपि रक्ता तिथौ ।
कन्यामन्मथमीनगे नववधू जाल मृगे तैलिकौ,
देवाचार्य सितेन्दुसौम्यदिवसे शुभं गुरौ भार्गवे ॥२००॥

Colophon : इति श्रीमुहूर्त्तरत्नावली सम्पूर्णा ।

\+ \+ \+

1663/30938 रत्नप्रदीप

Opening : ॥ श्रीगणेशाय नमः ॥

अथ योगाधिकारः लिख्यते–

प्रणम्य शारदादेवीं गणेशं शिवनन्दनम् ।
ब्रह्माविष्णुमहेशादि वक्षेहं जन्मजं फलम् ॥१॥

विलोक्य नानामुनि मतानि सर्वार्थदं जन्मफलं प्रकाशम् ।
नत्वा गुरोः पादयुगं च मातु करोमि रम्य किल रत्नदीपम् ॥२॥

श्रीमद्रायकवालवंशविभवो श्रीरामसेवारतः,
श्रौतस्मार्त्त विशेषधर्मनिरतो विद्यादयावारिधिः ॥
बुध्या वै जितचन्द्रजोर्ज्जितयशा विद्याजितो वाक्पतिः ।
कान्त्या वै जितचन्द्रमा भुवितले गोपालनामा गुरुः ॥३॥

तस्य प्रसादात्खलु रत्नदीपं चक्रे द्विजोयं किल नामदेवः ।
देवद्विजानां परिदाशमुत(?)सौम्याल्पबुद्धिर्द्विजदेवभक्तः ॥४॥

Closing :

शुक्रः श्यामो दीर्घतनुर्हिमध्यमयुतो वक्रातिकेशो ।
वीर्याढ्यो परिपीतवक्रनयनो माधुर्यवाक्याच्युत ।
अम्ले मूलफले रुचिर्विनयवान् शौर्येण वा संयुतः ।
स्त्रीभावो रुचिराननो द्विजपतिः सौम्याचलो वारिग ॥११॥

शनि कृष्णो दीर्घतनुः कृशोऽतिपिशुनो वाताधिको लम्पटो ।
मिथ्यावाक् खलु.पीतवर्णनयनो केशाधिको बालिशः ।
वृद्धस्त्री खल्वम्लेच्छयोवनवरो तिक्तरुचिर्वाकटौ ।
दुष्टो वै विपरीतदन्तनखरो मन्दोतिमन्दा गतिः ॥१२॥

वृद्धो मन्दगति.खलोचनचरो भिल्लाधिपो तोवरो ।
आम्ले चारु विराधिको हिमवनो स्त्रीविग्रहो दुर्मुखः ।
दुष्टो वै विपरीतलक्षणयुतो दीर्घः शरोरिकृशो ।
मानी वै गुणसंयुजोतिपिशुनो निद्रालसो चञ्चलो ॥१३॥

Colophon: इति गणपतिकृते रत्नप्रदीपे ग्रहस्वरूपवर्णनम् ।

1668/31136 विवाहपटल-चिन्तामणिटीकायुत

Opening :

॥ श्रीगणेशाय नमः ॥

ब्रह्माजहि (दि) शंकरखीन्दुकुजज्ञजीवशुक्रार्कपुत्रगणनाथगुरुन्प्रणम्य ।
यः सङ्ग्रहोर्कवरलाभविशुद्धबुद्धिरावंतिकस्य तमह वृणोमिसर्वम् ॥१॥

पुच्छास्त्रं सविता चकार विपुलैः स्कम्भैस्त्रिमिर्ज्योतिषं ।
तस्योच्छित्तिभयात्पुनः कलियुगे संसृत्य योभूदलम् ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधाद् ।
अल्पं ये प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते ॥२॥

वराहमिहिरो दधौ सुबहुभेदतो या कुले ।
ग्रहर्क्षगणयादसि प्रचुरयोगरत्नोज्वले ।
भ्रमन्ति सरितो यतो लघुधियोऽत्र लघ्वास्ततः ।
करोमि विवृतिं प्लवं निजधियाहमत्रोत्पलः ॥३॥

Closing :

वात्स्यं गार्ग्यवसिष्ठदेवलकृतं सत्यप्रणीतं तथा
दृष्ट्वा तानपि यद्वराहमिहिरो वैवाहिकं स्व व्यधात् ।
तस्मिन्विद्वदभीष्टंयोगजनितप्रेमादरप्रासघीः ।
शिष्याणामपि किं मया विवरणं चक्रेत्युत्पलः ॥१॥

वराहमिहिरप्रोक्ते विवाहपटलार्णवे ।
अर्थिनामुत्पलश्चक्रेऽर्थाशये विवृतिप्लवम् ॥२॥

चिन्तामणिरतिख्याता टीकेयं छात्रवल्लभा ।
अनुष्टुभां शतान्यस्या मानमुक्तं दिवाकराः ॥३॥

मया दोषान्परित्यज्य टीका सम्यग्विचारिता ।
उपयोग्या स्वशास्त्रेषु गूढशास्त्रार्थदीपिका ॥४॥

Colophon : इति श्रीवराहमिहिरकृतेविवाहपटलेभट्टोत्पलविरचिता टीका समाप्तिमगमत्

1705/31586 बुद्धिप्रकाश

Opening : ।। श्रीगणेशाय नमः ।।

अथ यात्राकुण्डलीफल लिख्यते–

तंनुस्थाने यदा क्रूराः यात्राकाले यदास्तदा ।
योगहानिश्च मृत्युश्च अधमाग्रे न शंशयः ।।१।।

लग्ने बुधे ज्यशुक्रश्च यात्राया सिद्धदायकः ।
तत्र स्थाने सप्तरोग्य लाभं च मासमात्रकम् ।।२।।

बुधश्च जीवे भृगुनन्दनेन्दु प्रस्थानकाले च यदा द्वितीये ।
शुभवस्त्र चैवं चतुरङ्गलाभं मासस्य मध्येपि चतुर्दशे-वा ।।३।।

यदा तनुस्था रविराहुभौमा शौरिश्च केतुश्च त्रिभिरेभि-मासा ।
देशे च नाशं च धनस्य नाश कुर्वन्ति मृत्यु मुनिवाक्य-मेतत् ।।४।।

स्थाने च तृतीये गुरुभार्गवे च सोमश्च पुत्रश्च निशापतिश्च ।
कुवन्ति कार्यं सफलं च सर्वं पक्षत्रये वापि दिनत्रयं च ।।५।।

Closing : यदा दिनमानगता घटिका घटिका तदनन्तरं अर्घकरा ।
तिथिवारनक्षत्रयोगयुता तिथिवारनक्षत्र वदन्ति सुरा ।।४६।।

योगिन्यो यमघटकालिविधिवत् दिवशूलराहुस्तथा ।
योगचक्रक च शशिदिनकरे भद्रासु रिक्तातिथि ।
अनंदादिविशुद्धयोगं च पुनः नक्षत्रवक्ता शिवा ।
यमद्धा हिं निरीक्ष्यते प्रकुरुते प्रस्थानयात्रा शुभा ।।५०।।

वर्ज्जितं पूर्वेरोहिण्यां उत्तरे हस्तमेव च ।
तथैव दक्षिणे चित्रा पुष्ये चंव तु पश्चिमे ।।५१।।

पूर्वे लक्ष्मीहानि स्यात् शरीरे दहति दक्षिणे ।
पश्चिमे मरणं प्रोक्तं उत्तरेकालनाशनः ।।५१।।

Colophon : इतिश्यामविरचितो बुद्धिप्रकाशः समाप्तः।

Post-colophon : पौष शुक्ला ४ शनिवार संवत् १९०१ लिपि नारायण-दत्तस्य आगरे मध्ये कचरीघाट ।